CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

।कालिदासप्रतिभोन्मेषः।

लेखनम्: लक्ष्मण कृष्ण पित्रे



Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

। कालिदासप्रतिभोन्मेषः ।

-रचयिता-

पित्रे उपाह्वः कृष्णसूनुर्लक्ष्मणशर्मा ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कालिदासप्रतिभोन्मेषनाटकस्थानां पात्राणां परिचयः प्रवेशानुक्रमेण ।

१ सूत्रधारः ।
२ नटी ।
३ राजपुरुषः अनुलोमः ।
४ राजपुरुषः विलोमः ।
५ गोपयुवा गोनन्दः ।
६ महामात्यो निशितबुद्धिः ।
७. दासी मधुकरिका ।
८ दासी मरालिका ।
९ राजदुहिता अवन्तिसुन्दरी ।
१० तस्याः सखी मदनिका ।
११ गोनन्दस्य सुहृद् ।
१२ कालीदेवी ।
१३ गणिका चतुरिका ।
१४ गणिकाहस्तकः कुम्भीलकः ।
१५ सिंहलराजः कुमारदासः ।
१६ सिंहलामात्यो जयवर्धनः ।
१७ राजपुरुषः तीक्ष्णायुधः ।
१८ निवेदकः ।

——×——

[रङ्गसूचना - यतः कथावस्तुनः कालः क्रिस्ताब्दस्य षष्ठं शतकम् (गुप्तकालः), ततः नेपथ्यरचना, पात्राणां रङ्गभूषा वेषभूषा च तत्कालसमुचिता स्यात् । सिंहलस्थ पात्राणां तु दक्षिणदेशोचिता । अङ्कानां मध्ये यन्निवेदनं तत्पर्यायेण सूत्रधारेणापि कर्तुं शक्यम् ।]

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ प्रास्ताविकम् ॥

विश्वास्मिन् विश्वे सम्प्रति विद्यमानासु प्राचीनतमायां संस्कृतभाषायाम् अपरिमिता खलु ग्रन्थसम्पत्। वेदवेदाङ्गानि, ब्राह्मणानि आरण्यकानि, उपनिषदः, तथाच रामायणमहा-भारते आर्षकाव्ये चेत्येतन्वाङ्मयमस्माकं भारतीयसंस्कृतेः जीवातुभूतम्। शास्त्रविषयेऽपि असंख्याः ग्रन्थाः। अभिजातवाङ्मये तु असङ्ख्यानां कविवरेण्यानां अनुपमेयकाव्यानि रसिकमनांसि रञ्जयन्ति। एतेषु कविश्रेष्ठेषु-सुरभारतीकण्ठाभरणभूतः एक एव कविः मूर्धन्यभूतः स्वप्रतिभाविलासेन। स कविश्रेष्ठो नाम कालिदासः यः कविकुलगुरुरिति विख्यातः। तत्काव्येषु यः रसराजशृङ्गारस्य परिपोषः समर्थतया कृतो दृश्यते, तस्मात् सः 'कविताकामिन्याः विलासः' इति यथार्थतया वर्णितः प्रसन्नराघवे जयदेवकविना।

कश्चायं कविः, कस्मिन् काले कस्मिन् प्रदेशे वा सम्भूत इति विषये विद्वत्सु मतान्तराणि विद्यन्ते, यतः तेन महाकविना स्वकाव्येषु स्वविषये किमपि नोपन्यस्तम्। अतः इतिहासगवेषकैः अन्विष्य प्रमाणानि तत्साहित्यतोऽन्यतो वा, प्रस्थापिताः विविधाः सिद्धान्ताः।

कालविषये, क्रिस्ताब्दपूर्व सार्धशतक-

व

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वर्षाणि कालिदासकालस्य पूर्वमर्यादा, यतः मालविकाग्निमित्रनाटकस्य नायकोऽग्निमित्रः सम्राजः पुष्यमित्रशुङ्गस्य पुत्रः ।। क्रिस्ताब्दस्य सप्तमं शतकं तत्कालस्य उत्तरमर्यादा यतः तत्कालसम्भूतस्य नृपस्य रविकीर्तेः शिलालेखे कालिदासस्योल्लेखः यत् -
स जयतां रविकीर्तिः कविताश्रितकालिदासभारवि-
-कीर्तिः। इति। अस्मिंश्च कालावधौ नैकैर्विद्वद्भिः कालिदासकालनिर्णयविषये विभिन्नानि मतानि प्रकटितानि। तेषां परिशीलनानन्तरमेवास्माभिः स्वीक्रियते यत् कालिदासः गुप्तसम्राजः द्वितीयचन्द्रगुप्त विक्रमादित्यस्य राजसभामलञ्चकारेति।

किंदेशीयोऽसौ इति विषयेऽपि नैकमत्यम्। वङ्गीयनवद्वीपप्रान्तवासीति वङ्गीया मन्यन्ते, अथ कुमारसम्भवे हिमवद्भागस्य सविशेषवर्णनात् तत्र हिमाचलप्रदेशे सम्भूतोऽमित्यन्यैर्मतम्। उज्जयिन्यादिप्रदेशानां सविशेषवर्णनात् स मालवीय इत्यन्यैर्घोषितम्। वयं तु इमं तृतीयं पक्षमेव स्वीकुर्मः।

कालिदासरचितानां ग्रन्थानां सङ्ख्या चत्वारिंशदधिकेति कथ्यते। किन्तु रघुवंशकुमारसम्भवंऋतुसंहारमेघदूतानि तस्य काव्यानि, मालविकाग्निमित्रविक्रमो-
-र्वशीयशाकुन्तलानि च तस्य नाटकानीति विद्वद्भिर्मतम्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तत्काव्यगतसन्दर्भैर्यदि अस्माभिः कालिदासस्य चरित्रानुमानं कर्तव्यं, तर्हि इदमेव दृश्यते, यत् सः उच्चकुलोत्पन्नः, विद्याधिगमात् प्रतिभाविष्काराच्च लोके महतीं प्रतिष्ठां प्राप्तः, सर्वशास्त्रेषु पारङ्गतः, नृत्यनाट्यसङ्गीतचित्रकलादिष्वपि निपुणः, रसज्ञः, विनयशीलः सौन्दर्यान्वेषी, वत्सलः, जीवने आनन्दमन्विष्यन्, तत्प्राप्तौ च साफल्यमनुभवन्, सर्वगुणसम्पन्नः नरश्रेष्ठः बभूव इति।

ननु सत्सु नैकेष्वन्येषु प्रतिभावत्सु कविषु, कालिदास एव कथं तेषां मूर्धन्यत्वं प्राप्तः? कोऽस्य काव्यस्य तादृशो विशेषः इति विचारणीयम्। ननु काव्यस्य आत्मा कः? कुतः काव्यं सहृदयहृदयाह्लादकारि भवति इति विषये पूर्वसूरीणां चत्वारः पक्षाः। 'रीतिरात्मा काव्यस्य' इति वामनस्य सिद्धान्तः। अलङ्कारः काव्यमिति भामहादीनाम् 'काव्यस्यात्मा ध्वनिरिति' आनन्दवर्धनेन प्रतिष्ठाप्यते। 'वाक्यं रसात्मकं काव्यम्' इति विश्वनाथेनोक्तम्। एतेभ्यः केनापि निकषेण यदि कालिदासकाव्यं परीक्षितं स्यात्तर्हि तत्सर्वोत्कृष्टमेव स्यात्।

वैदर्भीगौडीपाञ्चालीति रीतित्रयात् कालिदासेन स्वकाव्येषु माधुर्यव्यञ्जकैः शब्दैः ललितात्मिका वैदर्भीरीतिरेवाङ्गीकृता।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अपि च सा उपमा समर्थतया उपयोजिता यत् तद्विषये उपमुक्तिः प्रसिद्धा । -
वैदर्भी कविता स्वयं वृतवती श्रीकालिदासं वरम् ।

यदि अलङ्कारः काव्यमिति दृष्ट्या कालिदासकाव्यं परीक्ष्येत तर्हि तत् बहुविधैः सुभगैरलङ्कारैः मण्डितं पश्यामः। तत्काव्ये शब्दालङ्कारतो, अर्थालङ्काराणां बाहुल्यम् । स्वभावोक्तिस्तथा वक्रोक्तिमूलाः अलंकाराः विशेषतश्च सादृश्यमूलाः अलङ्काराः यथा उत्प्रेक्षारूपकोपमादयः कालिदासस्य काव्यस्य सौंदर्यं वर्धयन्ति। उपमालङ्कारस्तु कालिदासकाव्यस्य वैशिष्ट्यमेव। अत्र विस्तारभयादुदाहरणानि नैव दीयन्ते, किन्तु अस्मिन् पक्षेऽपि कालिदासकाव्यमुत्कृष्टम् इति वक्तुं न प्रत्यवायः।

काव्यस्यात्मा ध्वनिरिति पक्षेऽपि कालिदासकाव्यं विशिष्यते। कुमारसम्भवे पार्वतीपरिणयप्रसङ्गे यदा ऋषयः हिमालय-सपीपे विवाहं प्रस्तुवन्ति, तदा पार्श्वस्था सर्व शृण्वन्ती 'लीलाकमलपत्राणि गणयामास पार्वती।' एकैवैषा उमायाः कृतिः तस्या अशेषभावानामभिव्यञ्जिका। इत्यत्र उत्कृष्टं ध्वनितत्त्वं प्रादुर्भवति। तपश्चरन्त्या उमायाः वपुषि यदा पतन्ति प्रथमोदबिन्दवः तदा तेषां स्थितिः क्रमशः उत्कृष्टतया व्यनक्ति उमायाः वपुःसौंदर्यम्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रसात्मकं वाक्यमेव काव्यम् 'इति पक्षे कालिदासस्य निखिलं काव्यं रसपरिपोषस्य परमां सीमां आप्नोति कथयितुं शक्यते विशेषतस्तु रसराजशृङ्गारस्य, तस्य सम्भोगविप्रलम्भरूपयोः यः परिपोषस्तेन स्वकाव्ये कृतः, तेन एव कालिदासः 'कविताकामिन्याः विलास' इति पदवीं प्राप्तः।

अत्र संदर्भवशात् कालिदासकाव्ये कश्चिदेकः आक्षेपः, निराक्रियतेऽत्र। कालिदासकाव्यं त्यागप्रधानमाहोस्वित् तत् भोगप्रधानमिति विवादः दृश्यते। केचन विपश्चितः कालिदाससाहित्यं त्यागप्रधानमेवेति प्रस्थापयितुमुपक्रमन्ते। तेषां मते कालिदासेन परमार्थतया एतदेव प्रदर्शितं यद् भोगस्तावत् नित्यमेव परितापाय कल्पते। भोगिनो न कदापि परमसुखमाप्नुवन्ति। यथा शाकुन्तले प्रथमं पार्थिवं शारीरं प्रेम तदेव परिशुद्धिं प्राप्नुवत्, तयोः चिरनिर्वृतये भवति, यदा खलु दुर्वासइशापतो विप्रयोगरूपं परमदारुणं दुःखं तयोरनुभूतम्। कुमारसम्भवेऽपि तावदुमा ईप्सितं पतिं नावाप्नोति यावत् कठोरेण तपसा स्वशरीरं न क्लिश्नाति। अग्निवर्णस्यापि एतादृशी एव कथा रघुवंशे। विक्रमोर्वशीये पुरूरवापि एतादृशमेव दुःखमनुभवति विप्रयोगरूपम्। अतः एतदेव कालिदासस्य विवक्षितं, यत्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

केवलं भोगेष्वेवासक्तिः नियतमेव दुःखाय परितापाय च कल्पते, आसक्तेश्च त्याग एव परमं निर्वृतिपदमिति। अत्र कालियस्य साहित्यस्य भोगप्रधानत्वं प्रस्थापयन्तो वराकाः तत्साहित्यस्य त्यागप्रधानत्वमपह्नुत्य कालिदासं न्यूनपदवीं नयन्तीति।

वयं तु न तथेति ब्रूमः। इत्थमत्र प्रत्यवस्थीयते। या एषा कालिदासकाव्यस्य उदात्तीकरणे मीमांसा, सा तु श्रवणसुभगा खलु। किन्तु तत्कर्तारः कालिदासकाव्ये विद्यमानात् शृंगाररसपरिपोषाद् आनन्दमनुभवन्त्येव, किन्तु तदाक्षेपहेतु न स्यादित्यर्थं खलु स्वस्यैवोदात्तीकरणार्थं ते अनुदात्तमनसः कालिदाससाहित्यस्योदात्तीकरणार्थम् प्रयतमाना दृश्यन्ते। अस्याश्च तेषां विचारधारायाः मूलं चेदान्विष्येत, तर्हि तेषामियमेव धारणा कारणत्वेनोपतिष्ठति यत् यच्छरीरं यत्पार्थिवं, यद् भोगात्मकं तद्दुःखावहम्, तच्च गर्हणीयम्, अत एव त्याज्यं तदिति। एषा धारणा नितराम् असाम्प्रतेति मतमस्माकम्।

कथमिव? तदेवात्र साधयिष्यते। ननु किंनामाभिप्रेतं भोगशब्दप्रयोगेन? किं शरीरभोगात्मिका पाशवी आसक्तिरेव अथवा पञ्चेन्द्रियसंवेदनात्मिका सा जीवनोन्मुखी सहृदयसहजा प्रवृत्तिः?

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रथमा चेदभिप्रेता, नेति ब्रूमः। अस्माकं तु अभिप्रेता द्वितीया व्यापकतरा भोगपरिकल्पना चेदनया दृशा कालिदाससाहित्यं समालोच्येत भोगप्रधानत्वे तस्य न कोऽपि प्रत्यवायः।

कीदृशी तावत्सुभगजीवनोन्मुखी सानन्दसुखेयं प्रवृत्तिः? कथं चानया निखिलं कालिदाससाहित्यं परिपूरितम्? काव्यरसिकैरत्र अनुभवितुं शक्यते यत् कविः स्वकाव्ये क्षणशः कणशश्च सौंदर्यास्वादनं कर्तुं प्रवृत्त इति। अवधेयं शाकुन्तले कण्वाश्रमपदस्य सूक्ष्मतया कृतं वर्णनम्। अथवा रथगत्या विभ्रमम् आतन्वतः निसर्गस्य वर्णनम्। अथवा विक्रमोर्वशीये सायंकाले प्रासादवृद्धपरिजना-दीनां वर्णनम्।

अन्यश्चास्याः भोगवृत्तेरुल्लासो नाम उत्स्फूर्तत्वम्। जटाजूटधारिणां तापस-बटूनां दर्शनमेव यत्रापेक्षितं तत्रानपेक्षितस्य शिरीषकुसुमपेलवस्य कन्यकाजनस्य सुभगदर्शनेन उत्स्फूर्तमेव दुष्यन्तः उद्गिरति - 'अहो मधुरमासां दर्शनमिति'। एवं तद्वृत्तेः हार्द उद्गारः। क्वाचिदियं प्रवृत्तिः स्थलकालप्रसङ्गानामौचित्यमपि विस्मरति, विक्रमोर्वशीये, सैकते सिकतानिकेतनस्य रचनायां व्यापृतायाः विद्याधरदारिकायाः दर्शनेन पुरूरवाः उर्वशीमपि व्यस्मरन्। तत्रैव सङ्गमनीयमणौ गृध्रेणापहृते सति

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तत्रानिकारमकृत्वैव पुरूरवास्तं मार्गसहितं गृध्रमलातचक्रत्वेनोत्प्रेक्षते। एषा सा वृत्तिः सौन्दर्यान्वेषिणी। एषा एव सा भोगवृत्तिः यदात्मकं कालिदासकाव्यम्।

प्रकृतिविषये कालिदासस्य या प्रीतिः दृश्यते, सास्माकं मतमेव पुष्णाति। ऋतुसंहारे अलङ्कारादीनां मिषेण व्यक्तीकृतं भाव-साहचर्यं, रतिविलापे, अजविलापे, पुरूरवसश्च विलापे दृश्यमानं निसर्गमानवसाहचर्यम्, शाकुन्तले दृश्यमानं निसर्गस्य स्वतन्त्रं नाम व्यक्तित्वं, सर्वं चैतत् कालिदासस्य एतां तरलसंवेदनोन्मुखीं वृत्तिमेव व्यनक्ति।

अन्यच्च, कालिदासस्य काव्येषु तस्य रसिकतामभिव्यञ्जयन्ती सौन्दर्यात्मिका काचित् तार्किकी सुसङ्गतिरपि दृश्यते। उर्वश्याः तथाभूतमलौकिकं लावण्यं दृष्ट्वा पुरूरवाः सहसैवाभिप्रैति विक्रमोर्वशीये —

अस्याः सर्गविधौ प्रजापतिरभूत्
चन्द्रो नु कान्तिप्रदः
शृङ्गारैकरसः स्वयं नु मदनो
मासो नु पुष्पाकरः।

तन्मनो नैव स्वीकर्तुं शक्नोति यत् वेदाभ्यासजडस्य पुराणमुनेरियं निर्मितिः भवितुमर्हतीति। शाकुन्तले शकुन्तलायाः अप्सरःप्रभवत्वं विज्ञाय सः स्वविचारस्य युक्तियुक्ततां दर्शयति यत् —

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न प्रभातरलं ज्योतिरुदेति वसुधातलात्। किमस्याः वृत्तेः व्यापकत्वेन भोगात्मकत्वं निह्नोतुं शक्यते?

अत्र तु केचिदनुयुञ्ज्युः, यत् ननु शाकुन्तले यद्दिव्यं प्रेमोपवर्णितं, यच्च कुमारसम्भवे उमायाः दुष्करं तपः वर्णितम्, तत्कथमस्य भोगवादित्वेन सङ्गच्छेतेति।

नैष दोष इति ब्रूमः। अतोऽस्माभिर्न कदाप्युक्तं यत् कालिदासः आदर्शविमुखः केवलं भोगासक्तत्वं स्वकाव्ये वर्णयतीति। आम्, एतत्तु कथ्यते यत्तस्य आदर्शाभिमुखी प्रवृत्तिः केनचन् तस्य काव्यस्योपरि वर्तमाना काव्यगुणापकर्षिका न विद्यते, किन्तु कालिदासस्य जीवनोन्मुख्याः प्रवृत्तेः सा अन्तर्हितत्वेनानुभूयते तस्य काव्येषु। अत एव नैसर्गिकतया स्वाभाविकम् अकृत्रिमं सौन्दर्यमेवाभिवर्धयति। रघुवंशे ये राजानस्ते खलु प्रजायै गृहमेधिनः सन्ति। किन्तु तेषाम् अकाले एव पुत्रस्त्रीराज्यपरित्यागपूर्वकं वनगमनं न कुत्राप्युपवर्णितम्। रघूणां मनः कामं परस्त्रीविमुखं स्यात्, कामं च पौरवाः 'अनिर्वर्ण्यं परकलत्रम्' इति मन्यमानाः स्युः, किन्तु तेषां स्वकलत्रैः सह दाम्पत्यसुखानुभवः न कदापि निषिद्धः, न च नोपवर्णितः कालिदासेन।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

धर्ममनतिक्रम्य कामपुरुषार्थस्य साधनं तु तस्याभिप्रेतमेवासीत्। अतः कुमारसम्भवे उमाशङ्करयोः सुरतवर्णनमपि न दोषास्पदम्।

अन्यच्च कुमारसम्भवे यत्तपः उमा तपति पञ्चाग्निसाधनादिकं तत्तु तस्याः प्रेमसाफल्यार्थमेव खलु। एवं तु तप अपि भोग एव पर्यवस्यति। शाकुन्तलेऽपि कीदृशं तपस्तप्तं दुष्यन्तशकुन्तलाभ्याम्? तयोऽस्तु कथाऽऽसीत् दैवाद्विप्रयुक्तस्य युगलस्य, जात्यैवातिकोपिनो दुर्वाससः शापो नाम एतयोः प्रथममीलनस्य दुष्परिपाकः इति तु नैव शक्यते वक्तुम्। ननु शकुन्तलोपाख्याने अवर्तमानः दुर्वासश्शापप्रसङ्गः कालिदासेन किमर्थं योजितः, यदि तपस्कृता प्रेमशुद्धिः तस्य नाभिप्रेता, इति चेत्, उच्यते। तत्तु मूलकथागतदुष्यन्तस्य चारित्र्यं परिवर्तयितुमेव, तथैव पञ्चमाङ्के यः नाट्यप्राणभूतः सङ्घर्षः तस्योत्पादनार्थम् इत्यपि कथयितुं शक्यते। मेघदूते च विप्रलम्भशृङ्गारस्य यः परिपोषः दृश्यते, स तु परिशुद्धिकारकत्वेन कालिदासस्य नैवाभिप्रेतः। 'सुखं हि दुःखान्यनुभूय शोभते' इत्येव तस्य धारणाऽऽसीत्। अतः कालिदासकाव्ये या प्रवृत्तिर्दृश्यते सा न तु अमानवी न चाप्यतिमानवी किन्तु सत्यत्वेन मानवी एव दृश्यते।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जीवने यद्यत्सुभगं, तस्यतस्य आस-
-स्वादयिषुः आशादायिनी, जीवनस्यैकैकम्
अङ्गं समर्थत्वेनानुभवितुमिच्छन्ती सा
विद्यते। कालिदाससाहित्यं ह्यदि भोगात्मकं
तर्हि तदनया एव दृशा इति मन्यामहे।

कथमनुभूयते कालिदासकाव्यस्य
आनन्दः? कालिदासस्य कविताकामिनि खलु
मनोहारिण्या वैदर्भीरीत्या पेलवपदन्यासैः
अस्माकं पुरत आविर्भवति। सुभगैः सुरुचिरैः
अलङ्कारैराभूषिता सा अधिकमनोज्ञैव
प्रतिभाति। ततस्तस्याः प्रसादमाधुर्यगुणान्
वयमनुभवामः। ततश्च सा ध्वन्यर्थपूर्णैः
वचोभिरस्माकं मनो विनोदयति। एतया
प्रक्रियया वयं कालिदासकाव्यसृष्टावक्तरामः।
ततश्च अत्युत्कटेन रसपरिपोषे निमग्नाः
वयं परां निर्वृतिमाप्नुमः। इदमेव
कालिदासकाव्यस्य यशोरहस्यमिति मन्यामहे।

एतेन कविश्रेष्ठेन स्वविषये
स्वकाव्येषु किमपि नोपन्यस्तमित्यस्माभिः
उक्तपूर्वम्। किन्तु रसिकप्रियस्यास्य विषये
नैकाः आख्यायिकाः जनेषु ख्याताः श्रूयन्ते।
ताभिर्ज्ञायते, यदयं कश्चिदनाथो ब्राह्मणपुत्रः
केनापित् गोपेन प्रतिपालितः गोरक्षणं
करोति स्मेति। तद्देशस्य कलानिपुणा विदुषी
राजदुहिता विशेषापेक्षावशात् कमपि वरम्
नाभिमनुते स्म। तद्देशस्य कुटिलेन महामात्येन

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कपटेन तस्याः विवाहः अनेन गोपयूना सह सम्पादितः। तज्ज्ञात्वा कुपितया राजदुहित्रा स गोपयुवा प्रथमरजन्यामेव निष्कासितो गृहात्। सः कालीदेवीमाराधयत्, तया प्रसन्नया दत्तवरः सः विद्वान् प्रतिभावांश्च कविर्बभूव। यशो लब्ध्वा यदा नगरीं पुनरायातस्तदा राजदुहित्रा पृष्टः, यद् 'अस्ति कश्चिद् वाग्विशेषः?" तेन च सद्य एव प्रश्नस्य त्रीणि पदानि अनुसृत्य कुमारसम्भवमेघदूतरघुवंशानां त्रयाणां रचना कृता। पश्चात्तस्या तया प्रार्थितोऽपि सः तां पत्नीत्वेन न स्वीकृतवान् अपि तु गुरुरिति प्रणनाम। हताशया तया अभिशप्तश्च सः यत् तस्य मरणं स्त्रीकारणादेव स्यादिति। ततश्च व्यतीते काले स्वसुहृद् सिंहलराजेन कुमारदासेन आहूतः सः सिंहलदेशं गतः। तत्र कुमारदासायोजितायां समस्यापूर्तिस्पर्धाया-मुपस्थापितां 'कमले कमलोत्पत्तिः श्रूयते न तु दृश्यते' इति समस्यां गणिकामुखात् श्रुत्वा, 'बाले तव मुखाम्भोजात् कथमिन्दीवरद्वय' इति समस्यापूर्तिं झटिति कृतवान्। ततश्च तया लोभाविष्टया गणिकया पारितोषिकलोभात् सः घातितः, तत्काव्यं च स्वीयमिति प्रस्तुतम् यदा कुमारदासेन सत्यमवगतं तदा शोकावेगात् सः कालिदासचितायामेव स्वात्मानं दग्धवान्। एवं च कालिदासः पत्नीशापवशात् स्त्रीकारणादेव मृत्युं प्राप्तः। आख्यायिकातः सर्वमेतद् ज्ञायते।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कथाभ्य एताभ्यः कालिदासजीवने ये उत्कर्षापकर्षाः, यानि च सुखदुःखानि येचाद्भुतयोगाः, तेभ्य उन्मिलन्ती च या तस्य प्रतिभा, इत्येतस्य सुभगदर्शनं भवति। सत्यत्वे प्रमाणाभावादपि अतीव रोचकाः नाट्यात्मकाः एते प्रसङ्गा एव एतस्याः नाट्यकृतेः प्रेरणास्माकम्।

कथावस्तु तर्कसङ्गतं प्रयोगक्षमं च स्यादित्यर्थमावश्यकं कल्पनास्वातन्त्र्यम् अस्माभिरुपयोजितम्। प्रयत्नादस्मात् लोकमानसे विराजमानं कालिदासचरितं रसिकाणां पुरत आविर्भूयात्, सहृदयानां मनोरञ्जनमपि च स्यादित्येवास्माकं नटेश्वर-चरणयोरभ्यर्थनेति शम्।

—पित्रे इत्युपाह्वः कृष्णसुतो लक्ष्मणशर्मा।

———×———

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ कालिदासप्रातिभोन्मेषः ॥

- नान्दी -

निखिलं भुवनं यया निर्मितम्
सृष्टिर्यतो मूर्ततां याता ।
यस्याः कलाः चतुष्षष्टिमिताः
चतुर्दश च विद्याः सम्भूताः ।
प्रज्ञां मेधां प्रातिभासृष्टिम्
या सृजति नवोन्मेषशालिनीम् ।
आद्यमातरं तां नुमो वयम्
यच्छतु नः कृपया सुमतिं शम् ॥

[नान्द्यन्ते ततः प्रविशति सूत्रधारः]

सूत्रधारः - (प्रविश्य) अभिवादनम् अत्र उपस्थितानां कलारसिकानाम् । प्रस्तूयते अत्रभवतां पुरतः विश्रुतकथाभ्ये अवगानं कविकुलगुरुकालिदासचरितम् अस्माभिः। तदर्थं च पित्रे कुलोत्पन्नस्य कृष्णतनुजनुषो लक्ष्मणशर्मणः कृतिः कालिदासप्रातिभोन्मेषो नाम रूपकम् अभिनेतुं व्यवसितम् अधुना अस्माभिः । जगज्जननी आदिमाया अस्मिन् कार्ये सिद्धिं सम्पादयेत् इति विश्वासिमस्समाम् । (विचार्य) अये, कथं नु खलु अस्माकं सहधर्मचारिणी अद्यापि न उपतिष्ठति ? (नेपथ्याभिमुखं विलोक्य) अयि प्रियतमे, आगम्यताम् अविलम्बेन । रसिकानाम् एतेषाम् प्रतीक्षाकारणं मा भूः ।

[नेपथ्ये नटी - 'इयमहमागता नाथ।'

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नटी-(प्रविश्य) इयमहम् उपस्थितास्मि नाथ। गृहकार्ये व्यग्रत्वात् आगमने ईषद् विलम्बः क्षन्तुमर्हसि। कथयतु भवान् अधुना को नियोगो अनुष्ठीयताम् इति।

सूत्रधारः- प्रिये, अद्य अस्माभिः कालिदासप्रतिभोन्मेषः नाम नवं रूपकमत्र प्रयोक्ष्यते। यथापूर्वं, भवत्याः सहयोगेनैव एतद् संपत्स्यते।

नटी- यदार्य आज्ञापयति। अन्यस्मिन् समारोहे गन्तुकामापि अहं समुपस्थितात्र भवन्नियोगाद् रसिकरञ्जनार्थम्।

सूत्रधारः-युक्तम् आचरितं प्रिये। रसिकरञ्जनमेव अस्माकं प्रथमं कर्तव्यम्। (निर्वर्ण्य सस्मितम्) किन्तु प्रिये भवत्याः प्रसाधनं विशेषमिवाद्य प्रातिभाति। किमर्थं तदिति अस्त्यस्माकं कौतूहलम्।

नटी- आर्य, नाट्यविषयवशादेव अहमधुना कालिदासकाले वर्तमाना पुरन्ध्री रास्मि संवृत्ता, इति मन्तव्यम्। (श्रुत्वा) किन्तु आर्य, कुतोऽयं श्रवणमधुरो वंशीध्वनिः श्रूयते ननु? (अवधानं दत्वा) स्वररचनास्मिन् सङ्गीते न शास्त्रानुसारिणी, रागाधिष्ठिता वा दृश्यते। किन्तु रचनायामस्यां कापि स्वाभाविकी सुभगता अनुभूयते। पुरा गोकुले वंशीधरस्य वंशीस्वरेण या मोहिनी

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गोपीसमुदायस्य, सैवाद्य अनुभूयते मया।

सूत्रधारः - वास्तवमवधेहि आर्ये। न त्वं गोपी न चायं वंशीधरः कृष्णः इति स्मर्तव्यम्

नटी - आर्य, कोऽस्ति तर्हि वंशीवादकोऽयं युवा?

सूत्रधारः - प्रिये, नाट्यविषयवशाद् आवां सम्प्रति कालिदासकालीनं मात्यखेटकग्रामं प्राप्ता। अयं वंशीवादकस्तु कश्चन गोपयुवा। भूरिधेनुकगोपस्य गोधनं रक्षति सः। वंशीवादनं तस्य मनोविनोदनम्।

नटी - अहो सुभगाकृतिः प्रियदर्शनोऽयं युवा। (निर्वर्ण्य) तन्मुखस्य तेजस्वितया तु नायं गोपयुवकः, इति मन्ये।

सूत्रधारः - युक्तमनुमितं प्रिये। वस्तुतस्तु नायं गोपयुवा। वेदपारगस्य कस्यापि ब्राह्मणस्य पुत्रोऽयम्। दुर्दैववशात् पितृहीनोऽयं बालकः कारुण्यबुद्ध्या भूरिधेनुकगोपेन पालितः। बुद्धिमानपि विद्याविहीनोऽयं युवा सम्प्रति अत्र पितृतुल्यस्य भूरिधेनुकगोपस्य गोधनं रक्षति।

नटी - (निःश्वस्य) हन्त! कीदृशोऽयं दैवयोगः अस्य असाधारणा बुद्धिः केवलं गोरक्षणे उपयुज्यमाना दृश्यते।

सूत्रधारः - प्रिये, पिहितस्यापि रत्नस्य तेजस्तु नैव पिहितं भवति। अनधीतोऽप्ययं युवा

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नैकासु कलासु निपुणतां दर्शयति।
संगीतकौशलं तु त्वयानुभूतमेव अधुना।
चित्रकर्मण्यपि अस्य रुचिः दृश्यते
विविधानि गीतान्यपि विरचितान्यनेन।
यद्यपि रचनास्य अपरिष्कृता, तथापि
काचित् स्वाभाविकी प्रतिभा दृश्यते तत्र।
नटी - सत्यम्। न कश्चिद् बुद्धिमताम् अविषयो
नाम। (अवधानं दत्वा) अये, पश्यतु
आर्यः। द्वौ राजपुरुषौ तं किमपि
पृच्छन्तौ दृश्येते। किं नामास्माद्
अभ्यर्थितं स्याद् राजपुरुषाभ्याम्?
सूत्रधारः - एहि प्रिये, तद् ज्ञातुं तत्रैव गमिष्यावः।
[इति निष्क्रान्तौ]
॥ इति प्रस्तावना ॥
[प्रथमः प्रवेशः]
[विस्तीर्णः शाद्वलप्रदेशः, यस्मिन गावः
चरन्ति। एकस्मिन् शिलाखण्डे उपविश्य
गोपयुवा गोनन्दः वंशीवादने निरतः।
ततः प्रविशतः राजपुरुषौ, अनुलोमः
विलोमश्च।]
अनुलोमः - आर्य विलोम, भृशं श्रान्तोऽस्मि अहं
तस्य पुनः अन्वेषणेन। कुत्र नान्विष्टम्
नाम।
विलोमः सत्यं वदसि अनुलोम। ग्रामे ग्रामे,
नगरे, नगरे, गृहे गृहे, सर्वत्रावाभ्यां
अन्वेषणमनुष्ठितम्। किंतु स न प्राप्तः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अनुलोम- ग्रामे नास्ति, नगरे नास्ति, अतः सः वने एव स्यात्।

विलोमः- अथ किम्। अत्रापि यदि न दृष्टः तर्हि, पुनश्च अन्वेषणं, पुनश्च परिभ्रमणम्

अनुलोमः- (विलोक्य) तिष्ठ भोः विलोम। पश्य। तस्मिन् शिलाखण्डे कोऽपि युवा, गोधने दत्तदृष्टिः आसीनो दृश्यते।

विलोमः- (दृष्ट्वा) आम्। सः नु वंशीवादनेऽपि व्यग्रः दृश्यते। नाहं संगीतनिपुणः, किंतु अस्य वंशीवादनं कर्णमधुरमिति अनुभूयते।

अनुलोमः- अये, भवतु नाम तत् कर्णमधुरम्। महामात्यस्य आदेशस्तु न कर्णमधुरः। स्मरसि नु? आवां महामात्यस्य हस्तकौ। सर्वकार्येषु साहाय्यकौ।

विलोमः- आम्। वामदक्षिणौ हस्ताविव। किन्तु अहं दक्षिणहस्तः। त्वं नु वामहस्तः।

अनुलोमः- नैवेतदुचितं विलोम। अहं तावद् ज्यायान्। अतः अहमेव दक्षिणहस्तः, त्वं नु वामहस्त एव।

विलोमः (निर्वेदेन) भवतु तत्तथा। अलमधुना कलहेन। वस्तुतस्तु महामात्यस्य कौटिल्यम् ईदृशं, यद् दक्षिणहस्तेन कृतं कार्यं वामहस्तो न जानाति।

अनुलोमः वामेन कृतं दक्षिणो न जानाति। किन्तु प्रस्तुतं कार्यं नु हस्तद्वयेन करणीयम्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इति नात्र कलहविषयः ।
विलोमः- एहि तर्हि। त्वमेव युवकं पृच्छावः ।
अनुलोमः- यदि स एव, तर्हि तं राजधानीं
नयावः । यदि नागच्छेत् तर्हि---
विलोमः--तर्हि बलाद् गृहीतव्यः ।
अनुलोमः- तिष्ठ । प्रथमं तावत् निश्चेतव्यं यद्
अयमेव स युवा नवेति । महामात्यस्य
चित्रकारेण रेखितं चित्रं दर्शय तावत् ।
पश्यामि यन् साम्यं विद्यते नवेति ।
[विलोमः कारिकान्धात् चित्रं निष्कासयति
उभौ सूक्ष्मतया निरीक्षतः]
विलोमः- असंशयं स एवायं युवा यो महामात्येन
अपेक्षितः । एहि तावत् । तमुपगच्छावः ।
[गोपयुवकस्य समीपं गच्छतः]
विलोमः- अयि भोः । (तस्य अनवधानं दृष्ट्वा
उच्चैः) भोः गोपयुवक, श्रोतुं न शक्नोषि
किम् ?
गोनन्दः-(अवधानं दत्त्वा) मामुद्दिश्य किमपि
उक्तं वा ?
अनुलोमः- अये, केन सह संभाष्यते तर्हि ?
एतेन समीपस्थेन वृक्षेण किम् ?
विलोमः- (अनुलोमं हस्तेन निवार्य) अस्तु
कश्चित् संयमः । (गोपयुवकं प्रति)
वत्स, त्वामेव उद्दिश्य अनुयुज्यते ।
किंनामधेयस्त्वम् ?
गोनन्दः- राजपुरुषौ, युवां न जानाम्यहम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तथापि, पृष्टस्य नामकथनं मे कर्तव्यम्। भोः, गोनन्द इति मे नामधेयम्, गोरक्षणं मम कार्यम्, वंशीवादनं च मे मनोविनोदनम्।

अनुलोमः- (स्वगतम्) अये, अस्य वचनमपि काव्यमयमिव श्रूयते। कीदृशो नाम युवा अन्विष्यते महामात्येन! (प्रकाशम्) अयि भोः, महामात्येनादिष्टम् यत् कश्चिद् विशिष्टो युवा राजधानीम् आनेतव्य इति। भवतः रूपं तस्य यूनः सदृशं दृश्यते। अतः त्वमेव सः युवा, यं महामात्यो द्रष्टुमिच्छति इति चिन्तयावः। तर्हि प्रयाणार्थं सज्जो भव।

गोनन्दः -(सम्भ्रमेण) श्रृणोमि भवतो वचनं, किन्तु न जानामि तदभिप्रायम्। किं नु खलु कार्यं स्याद् महामात्यस्य मादृशेन गोपयुवकेन सह?

विलोमः - ननु स एव जानीयात्। अस्माकं आदेशस्तु, तव तत्र उपस्थापनमात्रम्। तदेव आवाम् अनुतिष्ठावः।

गोनन्दः— महामात्यस्य हेतुं न जानामि। तर्हि कथं मे प्रस्थानमपेक्ष्यते?

अनुलोमः- किं न जानासि महामात्यस्य अवज्ञायाः फलम्? तस्यादेशस्तु अनतिक्रमणीय. नान्यः कल्पः त्वत्कृते प्रयाणाद् ऋते।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विलोम: - यदि नायासि, तर्हि बलात् नीयते।
गोनन्द: (नि:श्वस्य) बाढम्। प्रभुत्वमतिशेते
विद्वत्त्वम्। सिद्धोऽहं प्रयाणाय।
[सर्वे निष्क्रान्ता:]

[द्वितीय: प्रवेश:]

[अवन्तिपुरे महामात्यस्य प्रासादकक्ष:।
महामात्यो निगूढितबुद्धि: विचारमग्न:
गतागतं करोति।]

महामात्य: - (स्वगतम्) जराजर्जर: महाराज:
चण्डसेनस्तु सम्प्रति रुग्णशय्यायाम्
वर्तते। अत: राजदुहितु: अवन्तिसुन्दर्या:
विवाहायोजने तेनाहं नियोजित:।
मेधाविनी विदुषी राजदुहिता तु
कमपि वरत्वेन न स्वीकरोति।
महाराजस्य पुत्रहीनत्वात् तस्या:
पतिरेव राज्यस्वामी भविष्यति।
अहं तु राजसिंहासने दत्तदृष्टिरिति
तयानुमितं स्यात्, यत: सा प्राप्तावसरे
मम अवमानपरा अनुभूयते।
(कुटिलतया विहस्य) बाढम्। एवमेव
कर्तव्यम्। यदि मम कुटिलहेतु:
सिद्धिं गत: तर्हि एकेशरेण लक्ष्य-
-द्वयभेदो भविष्यति। राजदुहितु:
लज्जाभङ्ग: मम च प्रभुत्वम्।
तस्या: मूढ: पतिर्नाम ममैव वशंवद: स्यात्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

साधु निशितबुद्धे, साधु! अतुल्यं ते कौटिल्यं नाम। अचिरेणैव अवन्तिराज्यं प्राप्स्यसि! किन्तु किमर्थम् अद्यापि नानीतो स युवा राजपुरुषाभ्याम्?

[यूना सह राजपुरुषौ प्रविशतः]

अनुलोमः— प्रणमामि अमात्यवरम्।

विलोमः— प्रणमामि अमात्यवरम्।

महामात्यः— स्वस्ति युवाभ्याम्।

अनुलोमः— महामात्य, भवतः आदेशमनुसृत्य अन्विष्टमावाभ्यां ग्रामे ग्रामे नगरे नगरे।

विलोमः— प्राप्तश्चायं युवा भवतो वर्णनानुसारी मालयखेटक ग्रामे।

अनुलोमः— आनीतश्च भवत्समीपे यथादेशम्।

महामात्यः— शोभनम्। गच्छतं युवां स्वस्थानम्।

उभौ— यथा आज्ञापयति महामात्यः।

[उभौ निष्क्रान्तौ।]

महागोनन्दः— (सम्भ्रमेण) प्रणमामि अमात्यवरम्।

महामात्यः— स्वस्त्यस्तु ते। (तं निरीक्ष्य) आम्! त्वमेव स युवा नाम यद्विषये श्रुतमस्माभिः!

गोनन्दः (सभयम्) किं नाम श्रुतं महामात्येन किमपराद्धं मया?

महामात्यः— (सस्मितम्) अलं भयेन। यत् श्रुतं तदनुकूलमेव। अनधीतोऽपि त्वं संगीतरसिकः, चित्रकारोऽप्यसि। काव्यरचनामपि करोषीति श्रुतम्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गोनन्दः (आश्वस्य, विनयेन) अथ किम्। दैववशात् अनधीतोऽप्यहं सङ्गीते रुचिं करोमि। चित्रकलायां प्रयते, तथा च कांचित् काव्यरचनामपि करोमि।

महामात्यः (कृतकस्नेहेन) हन्त! त्वादृशः प्रतिभावान् युवा नार्हति केवलं गोरक्षणं कर्तुम्। अस्ति काचित् योजना सुनिश्चिता अस्माभिः त्वत्कृते।

गोनन्दः- (स्वगतम्) अस्याकारणस्नेहोऽपि भयमुत्पादयति। (प्रकाशम्) अनुगृहीतोऽस्मि महामात्य। किन्तु किमस्याः कृपायाः कारणमिति ज्ञातुं न शक्नोमि।

महामात्यः- कारणं ज्ञास्यते यथाकालम्। सम्प्रति तु त्वद्विषये अस्माकम् अनुकम्पा इत्येव कारणं पर्याप्तं स्यात्।

गोनन्दः- का सेवा अनुष्ठीयतामिति आदेष्टव्यम् महामात्य।

महामात्यः- कार्यमस्माकं न दुष्करम्। त्वयैकं नाटकम् अभिनेतव्यम् अस्मत्कृते। यदि करोषि तत्, तर्हि आजन्म सुखिना भवितव्यम्। राजवैभवं च उपभोक्तव्यं त्वया।

गोनन्दः- (सम्भ्रान्तबुद्ध्या) नाटकं नाम! महामात्य, नाहम् अभिनयकुशलो नटः। कथं नु नाटकं कर्तुं प्रभवेयम्?

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

महामात्य:- त्वया तु राजपुत्रत्वेन अभिनेतव्यम्। दूरस्थहिमाचलप्रदेशाद् आगतो राजपुत्रो भविष्यसि त्वम्। अस्मिन् प्रदेशे पर्यटनार्थमागतः दैववशाद् दृष्टो मया। भाविवररूपेण अस्माभिः राजदुहितुः समीपे नेष्यते। तथा त्वयाऽभिनेतव्यं, यथा राजदुहिता वरत्वेन त्वां स्वीकुर्यात्।

गोनन्दः- (तीव्रस्वरेण) किं राजदुहिता मया वञ्चयितव्या नाम? नैवेतत् कर्तुं प्रभवामि महामात्य। स खलु राजद्रोहः स्यात्। क्षन्तव्योऽहं महामात्य।

महामात्य: (कठोरतया) किं रे मूढ, तव राजनिष्ठा इयती तीव्रतरा, यद् स्वप्राणसङ्कटमपि न गणयसि?

गोनन्दः- (सम्भ्रमेण) भवतोऽभिप्रायं नैव जानामि महामात्य। राजदुहितरं वञ्चयितुं न प्रभवामीत्यर्थं कुतो मे प्राणसङ्कटम्?

महामात्य: (क्रूरतया विहस्य) अयि मूर्ख, किमेतदपि न जानासि यत् त्वत्कृते न कोऽपि पर्यायोऽवशिष्टः। अधुना त्वया ज्ञाताऽस्माकं भावियोजना। यदि न स्वीकरोषि, तर्हि ते मृत्युः निश्चित एव, अस्माभिः स्वरक्षार्थम्। अतः सहयोगो मरणं वेति ते विकल्पः,

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गोनन्दः- अपि नास्ति कोऽप्यन्यः पर्यायः महामात्य!
महामात्यः- अथ किम्। अस्माकं सहयोगेन त्वया राज्यवैभवम् उपभोक्तव्यम्, आहोस्वित् राजमित्रत्वेन मरणं प्राप्तव्यमिति त्वयैव निर्णयः भवतु। आशास्महे यत् त्वं स्वात्मानं मरणसंकटे निक्षेप्तुम् न प्रवर्तसे इति।
गोनन्दः- (स्वगतम्) हन्त। कीदृशीयं शृंगापत्तिः प्राप्ता नु? भगवति कालीमातः रक्ष माम्। यदि 'ओमिति' ब्रवीमि, तर्हि राजद्रोहः। यदि नेति वदामि तर्हि मरणं मे सुनिश्चितम्।
महामात्यः- रे गोपयुवक, सुविचार्य विधातव्यम्। नेत्युक्त्वा त्वं वृथा प्राणैर्वियुज्यसे। मम कार्यं तु केनाप्यन्येन संपत्स्यत एव।
गोनन्दः (स्वगतम्) युक्तमुक्तम् अनेन। न युज्यते नेति वक्तुम्। सम्प्रति ओमिति उक्त्वा स्वात्मानं रक्षामि, ततश्च अवसरं प्राप्य, राजदुहितरमस्य सर्वं कौटिल्यं निवेदयामि। (प्रकाशम्) महामात्य अनतिक्रमणीयो भवदादेशः सिद्धोऽहं तत्पालनाय।
महामात्यः-(संतोषेण) उचितं निर्णीतं त्वया।
गोनन्दः- किन्तु महामात्य। भर्तृदारिका नैव मूढा। नितरां बुद्धिमती सा वञ्चयितुम् अशक्यैवेति मन्ये। मम केवलं सा

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तत्क्षण एव ज्ञास्यति।
महामात्य:- तद्विषये चिन्ता मास्तु। तव वयस्यरूपेण
म हस्तकः सततं ते निकटवर्ती
भविष्यति। भर्तृदारिकायाः प्रश्नानाम्
उत्तराण्यपि स एव दास्यति।
गोनन्द:- युक्तमुच्यते महामात्येन। किन्तु ईदृशं
वञ्चनमेकवारमेव शक्यम्। विवाहाद्
अनन्तरं यदा सा मम योग्यतां ज्ञास्यति
तदा को मां रक्षेत् ?
महामात्य:- (कुटिलतया विहस्य) अलं चिन्तया।
वञ्चितापि सा प्रजाजन समीपे स्वस्य
मूर्खत्वं न स्वीकरिष्यति। सा किमपि
न वक्ष्यति, येन सा परिहासास्पदं स्यात्।
गोनन्द:- किं मे स्थानं स्याद् विवाहानन्तरम् ?
महामात्य:- प्रथमं तावद् राजजामातुः प्रतिष्ठां
प्राप्स्यसि। ततश्च जराजर्जरस्य
महाराजचण्डसेनस्य निधनानन्तरं
त्वामहं राजसिंहासने प्रस्थापयिष्यामि।
किन्तु प्रभुत्वं तु ममैव स्यादित्यवधेयम्।
गोनन्द:- सत्यम्। भवदुपकारो न विस्मर्तव्यः।
महामात्य:- साधु। सम्प्रति तावदनेन सेवकेन
सह गत्वा वेषपरिवर्तनं कर्तव्यम्।
अस्मन्नियुक्तेन तव नूतनसुहृदा
सह परिचयोऽपि कार्यः।
गोनन्द:- यथाज्ञापयति महामात्यः।
[प्रणम्य निष्क्रान्तः।]

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

महामात्यः - (स्वगतम्) साधु निशितबुद्धे। एतस्य स्वीकृत्या अर्धं तव कार्यं सम्पन्नमेव। राजदुहितुः अवन्तिसुंदर्याः विवाहानन्तरं तु मे राजसिंहासनं निकटतरं स्यात्।

[विहस्य निष्क्रान्तः]

[तृतीयः प्रवेशः]

[राजप्रासादवीथिः। पुष्पमालाः प्रसाधन-साधनानि च गृहीत्वा प्रविशति दासीद्वयम्]

मधुकरिका - अयि मरालिके, एहि अविलम्बेन। भर्तृदारिकायाः विवाहमङ्गलस्यायं मुहूर्तक्षणः सम्प्राप्तः। तस्याः प्रसाधनम् अविलम्बेनैव साधयितव्यम् आवाभ्याम्।

मरालिका - एहि, सज्जाऽहं मधुकरिके। महामात्येन तु अद्यैव निश्चितो मुहूर्तः। अतोऽयं संरम्भः खलु। ह्यः राजकुमारेण दृष्टा भर्तृदारिका, तत्रैव अभिमता च सा, अद्य तु विवाहोऽपि त्वरितमायोजितः महामात्येन। सर्वमेतद् विस्मयकरमेव।

मधुकरिका - मरालिके, त्वया दृष्टो नु राजकुमारः। अतीव सुभगं तस्य रूपवैभवम्। ननु मोहितैव भर्तृदारिका तेन। यत्प्रष्टव्यं तदपि विस्मृतम्। यच्च पृष्टं तस्यापि उत्तराणि वयस्येनैव प्रदत्तानि। राजकुमारस्तु मितभाषी स्मेरवदन एव आसीत्। सर्वमेतद्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

निरीक्षितं तत्रोपस्थितेन महामात्येनापि।

मरालिका - दिष्ट्या भर्तृदारिकाया: चिरप्रतीक्षित: विवाहस्तु सम्पद्यते इत्येवावयोः श्रन्तोषास्पदम्। जराजर्जरो भर्ता चण्डसेन: नितरां प्रमुदित: श्रुतैतां वार्ताम्। कम्पयुत: कृशहस्त: तेन आशीर्वचःपूर्वकं कथं भर्तृदारिकाया: मस्तके निहित:, इति दृष्टमेव त्वया।

मधुकरिका - अस्तु। त्वरयावस्तावत्। घटिकाद्वयेन विवाह: सम्पत्स्यते। ततश्च प्रीतिभोज: तदनन्तरमायोजितायां कविगोष्ठ्यां कुमारोऽपि कवितापाठं करिष्यतीति श्रुतं मया।

मरालिका - आम्। गोष्ठीसमापनानन्तरमेव कुमार: भर्तृदारिकाया: कक्षं प्राप्स्यति इति मन्ये।

मधुकरिका - तर्हि तावत्। आवां भर्तृदारिकाया: विशेषप्रसाधनस्य कार्यमनुतिष्ठाव:।

[उभे निष्क्रान्ते]

—×—

[नेपथ्ये विवाहमन्त्रा: श्रूयन्ते। -
- गृभ्णामि ते सौभगत्वाय हस्तं
मया पत्या जरदष्टिर्यथा स:।
भगो अर्यमा सविता पुरन्धिर्
मह्यं त्वा दुर्गार्हपत्याय देवा:॥ -
मंगलवाद्यध्वनिश्चापि श्रूयते।]

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

[चतुर्थः प्रवेशः]

[राजप्रासादे अवन्तिसुन्दर्याः कक्षः। पुष्पमालाभिः अलंकृतः। नवपरिणीता राजदुहिता सोत्कण्ठं पतिं प्रतीक्षते। तस्याः सखि मदनिका प्रविशति।]

मदनिका- (प्रविश्य स्वगतम्) भर्तृदारिकायाः चिरप्रतीक्षितः विवाहस्तु अद्य सम्पन्न महामात्येन स्वयम् उपानीतस्य युवराजस्य प्रसूनायुधस्य रूपवैभवेन मोहिता इव खलु भर्तृदारिका। भर्तृदारिकया प्रथमदर्शने अभिमतेन युवराजेन सह तस्याः विवाहमंगलमपि महामात्यस्याज्ञया अद्यैव सम्पन्नमिति मे विस्मयः। धन्यः खलु युवराजः येन एतादृशी मेधाविनी विद्याविभूषिता अनुपमसौंदर्यवती च पत्नी लब्धा। भर्तृदारिकाम् अधुना पश्यामि। (उपगम्य) हला भर्तृदारिके, भर्तारं प्रतीक्षसे ननु?

अवन्तिसुंदरी - हला मदनिके, विस्मयकरोऽयं योगः दिनत्रय एवाहम् अनुरूपं वरं प्राप्य परिणीतास्मि, इत्यर्थे नाद्यावधि अहं विश्वसितुं शक्ता। सफला मे मनोरथाः। किन्तु आर्यपुत्रः किमर्थम् अद्यापि न प्राप्तो ननु?

मदनिका - भर्तृदारिके, विवाहकौतुकानन्तरम् आयोजिते

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कविगोष्ठीप्रसङ्गे बहुतरः समयो व्यतीतः।
तत्र आर्यपुत्रेणापि काव्यपाठः कृतः।
श्रवणेन परितुष्टाश्च अशेषा नागरिकाः।

अवनिसुंदरी - (खेदेन) हन्त। नवपरिणीताहं तत्रोपस्थातुं न शक्ता, इति महान् मे विषादः। ननु एतावता समयेन कविगोष्ठी अवसितेव स्यात्। तदद्यापि किमर्थं नागमिष्यति आर्यपुत्रः ?

मदनिका - (स्वगतम्) नूनम् अतीव उत्कण्ठिता भर्तृदारिका आर्यपुत्रस्य दर्शनार्थम् इति दृश्यते। (प्रकाशम्) हला भर्तृदारिके, ननु अलमनया अधीरतया। कविगोष्ठ्या अनन्तरं युवराजः स्वसुहृदा सह सम्भाषणे व्यग्रः। तदवसाने ननु आगमिष्यत्येव अचिरात्। [निष्क्रान्ता]

[नेपथ्ये प्रतिहारी - 'इत इतो कुमारः।']

अवनिसुंदरी - (श्रुत्वा सहर्षं स्वगतम्) आर्यपुत्रः आगत इति तर्कयामि। सोत्कण्ठ मानस, धीरेण भाव्यम्। स्थिरेण भाव्यम्।

[राजपुत्रवेषेण गोपयुवा प्रविशति। तन्मित्ररूपेण नियोजितो महामात्यहस्तकोऽपि तेन सह प्रविशति।]

मित्रः - (अपवार्य सोपरोधम्) युवराजप्रसूनायुध महामात्याज्ञया अद्ययावत् भवता मित्ररूपेण अभिनीतं मया। भवत्कृते भर्तृदारिकायाः प्रश्नानां चतुराणि उत्तराणि

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अपि प्रदत्तानि मया। अन्यस्मिन् दिने महामात्येन प्रदत्तस्य काव्यस्य अभ्यासं कारयित्वा तत्काव्यं भवन्मुखात् श्रावितमपि कविगोष्ठ्याम्। अतः परं कार्यं तु भवतैव असहायेन अनुष्ठेयम् यथा महामात्यस्य अपेक्षितं स्यात्। साधयामि तावत् [निष्क्रान्तः।]

गोनन्दः - गतोऽयं महामात्येन नियोजितः कृतक-सहायः। यत्सत्यम्, एतावत्कालपर्यन्तम् अनेनैव मे लज्जारक्षणं कृतम्। अधुना तु सत्त्वपरीक्षाप्रसङ्गः। कालीमातः, कृपां कुरु। देहि बलं निर्वर्तयितुमिमं प्रसङ्गम्। (कृतकधैर्येण अवन्तिसुंदरीम् उद्दिश्य) भर्तृदारिके - (जिह्वां दष्ट्वा) अयि प्रिये, अहं विलम्बितः। किं भवती रुषिता? क्षमां याचामि।

अवन्तिसुंदरी - (स्वगतम्) अशुद्धं भाषते आर्यपुत्रः। 'रुष्टा' इत्यत्र 'रुषिता' तथा च 'याचे' इति वक्तव्ये 'याचामि' इति निगदितमनेन। सम्भ्रमः स्यादथवा प्रदेशभाषावैशिष्ट्यं वा? स्यादिदं तथा। (प्रकाशम्) प्रणमामि नाथ, काव्यगोष्ठ्यां भवतो निपुणता श्रुता मया, प्रियसखीतः। अनन्तरं चतुरसुहृदा सह वार्तालापः विलम्बकारणमित्यपि साहजिक-मेव। नाथः स्वपत्नीं स्मरतीत्येव अनल्पमिति मन्ये!

गोनन्दः - अथ किम्, अथ किम्। निकटतमः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सः सुहृद् । तेनैव मम लज्जारक्षणं कृतम् - (जिह्वां दष्ट्वा) - ननु सर्वथा साहाय्यं कृतमिति विवक्षितम् ।

अवन्तिसुंदरी - (स्वगतम्) सत्यम् अज्ञात इवायं पुरुषः प्रतिभाति । (प्रकाशम्) प्राणेश्वर भवतो प्रथमदर्शनसमये सुष्ठु परिचयो न जातः । भवतो दूरस्थराज्यविषये विशेषं ज्ञातुमिच्छामि ।

गोनन्दः - (ससम्भ्रमम्) राज्यम् ? कीदृशं राज्यम् ? (स्वात्मानं स्थिरीकृत्य) आम्, अस्माकं राज्यं नु ? -- तन्नु गोपराष्ट्रम् । अतीव दुर्गमम् -- (किमपि विचिन्त्य) तस्मिन् दुर्गमे प्रदेशे न विद्याध्ययनं शक्यम् । अतोऽहमनधीतः खलु ।

अवन्तिसुन्दरी - (स्वगतम्) किं नायं पुरुषः विद्यासम्पन्न यथा मयानुमितम् ? तत्र हि युज्यते अस्य भाषादोषः । हन्त । वञ्चितास्मि खलु अस्य रूपवैभवेन । (प्रकाशम्) आर्यपुत्र, ननु मेधाविनां किमज्ञातम् ? भवतां बुद्धिसामर्थ्येन वेदवेदाङ्गानि, चतुर्दशविद्याः चतुष्षष्टिकलाः च लीलया समधिगता स्युरिति मन्ये ।

गोनन्दः - (स्खलितवचनेन) अथ किम्, अथ किम् वेदाः -- ज्ञाताः । वेदाङ्गान्यपि हस्तानि चतुर्दशविद्याविषयेऽपि श्रुतम् । चतुष्षष्टिकलाविषयेऽपि श्रुतमेव ।

अवन्तिसुंदरी - (स्वगतम्) किं, श्रुतमिति ? तत् निश्चयेन

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एवायम् अनधील एव। ननु अस्य राज्यमपि विद्यते, न वेति मे संशयः। (विचार्य) इदं तावत् प्रष्टव्यम्। (प्रकाशम्) आर्य, कियद् विस्तारं भवतो राज्यम् कियत्संख्यो वा प्रजासमूहः इति मे जिज्ञासा।

गोनन्दः - (स्वगतम्) आः, मृतोऽस्मि। प्राणा मे कण्ठगताः। महामात्येन कीदृशे सङ्कटे पातितोऽहम्? किं कथयामि साम्प्रतम्? राज्यं तु मया नैव दृष्टम्! किंसंख्याका प्रजेति वक्तव्यम्? 'भूरिधेनुक' तातस्य गोसंख्यामेव कथयामि नु? (प्रकाशम्) बहुविस्तारं राज्यमस्माकम्। बहुसंख्याका च प्रजा। बहुविधं सैन्यमपि अस्ति।

अवनिसुंदरी - (स्वगतम्) वचनेऽस्य दृढता नैव प्रतीयते। सर्वमपि संदिग्धम्। किमपि कैतवमिव मे प्रतीयते। सत्यं तु मयाद्य ज्ञातव्यमेव। भवतु, एवमेव वदामि। (प्रकाशम्) आर्य, अद्यतनः विवाहसमारोहः सुखतया सम्पन्नः। अथ, श्वः परश्वो वा स्वराज्यं प्रति प्रस्थातव्यमिति प्रार्थये।

गोनन्दः - (सम्भ्रमेण) प्रस्थातव्यम्? ... कुत्र नाम प्रस्थातव्यम्? ... अत्रैव निवासो युज्यते साम्प्रतम्। कतिचिद् दिनानन्तरं तद्विषये विचारयिष्यावः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अवन्तिसुंदरी -(संशयेन स्वगतम्) निश्चयेनात्र कपटनाटकमेव विद्यते। रूपमस्य पुरुषस्य शोभनम्, किन्तु गुणास्तु नैव तदनुसारिणः। न विद्या, न च संस्कारा प्रतीयन्ते। हा देवदत्तक, केन कापुरुषेण सह मे संयोगः कृतस्त्वया।

गोनन्दः- (भीत्या अस्वस्थतया च) आर्ये, कस्मिन् गहने विचारे व्यग्रासि त्वम्? किमर्थमेते बहवः प्रश्नाः? अद्य आवयोर्विवाहस्य प्रथमा रजनी। मधुयामिनी। तत् किमनेन कालापव्ययेन?

अवन्तिसुंदरी -(तीव्रस्वरेण) किम् अभिहितम् आर्येण? मधुयामिनीति? तत् किमीप्सितम् आर्येण? श्रोतुमिच्छामि तावत्।

गोनन्दः- (भीत्या सम्भ्रमेण च स्वगतम्) किं कुर्याम्? किं वदानि इदानीम्? (प्रकाशम्) आर्ये, बहु श्रान्तोऽस्मि। अधुना --- अधुना तु स्वपितुमिच्छामि।

अवन्तिसुन्दरी- (स्वगतम्) अधुना तु मम संशयः निश्चये परिवर्तितः। (प्रकाशं दृढस्वरेण) आर्य, सत्यं वक्तव्यम्। कोऽसि भवान्। युवराजो वा अन्यः कोऽपि वा? भवतो वचने सत्यस्य लेशोऽपि न प्रतीयते मे।

गोनन्दः -(कृतकधैर्येण) आर्ये अधिक्षेपोऽयम् अस्माकम्। राजकुलीना वयं, नेतादृशस्य

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वचनस्य अभ्यस्ताः। क्षणमप्यत्र स्थातुं नेच्छामि। अयमहं गच्छामि।
[अवन्तिसुन्दरी भित्तिलग्नं खड्गं निष्कास्य तस्य कण्ठं स्पृशति।]

अवन्तिसुंदरी – तिष्ठ रे कापुरुष। कुत्र यासि मां वञ्चयित्वा? सत्यं वद, कस्त्वमिति केन वा नियुक्त इति। अन्यथा ध्रुवं प्राणैर्वियुज्यसे।

गोनन्दः – (प्राणभयेन तस्याः पादयोः पतति) क्षन्तव्योऽहम् भर्तृदारिके। नाहं खलु राजकुमारः। अहं कश्चिद् गोपयुवास्मि।

अवन्तिसुंदरी – गोपयुवा नाम? तर्हि कथमेतादृशे साहसे प्रवृत्तोऽसि स्वप्राणानपि अगणयन्?

गोनन्दः – अभयमस्तु भर्तृदारिके। सर्वं कथयामि, प्रलोभनात् प्राणभयाच्च अहमस्मिन् गर्हणीये कार्ये प्रवृत्तः।

अवन्तिसुंदरी – कुतः प्रलोभनं, कस्माच्च प्राणभयं ते।

गोनन्दः – महामात्यतो, भर्तृदारिके। महामात्यस्य एवेदं कपटनाटकम्। तेनैवाहम् अस्मिन् कर्मणि प्रवर्तितः। न मेऽत्र कोऽपि दोषः, भीरुत्वात् दौर्बल्याद् विना। क्षमामर्हति अयं जनः।

अवन्तिसुंदरी – (खड्गं संहृत्य विषादेन) हन्त। महामात्यस्येदं कैतवं नाम। सम्प्रति तातचरणानां जराजर्जरतया, महामात्ये

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अतिविश्वासाच्च, तस्य कुटिलहेतुः सिद्धिं गतः। किंतु नैतदहं सोढुं शक्नोमि। दुःसहेयं वंचना। (गोनन्दं प्रति) गच्छ रे गोपयुवक! त्वन्मुखदर्शनमपि मे असह्यम्। अपेहि तावत्।

गोनन्दः- (परमविषादेन दमितयाच) कुत्राहं गमिष्यामि भर्तृदारिके। गोपसमाजेऽपि मे स्थानं न विद्यतेऽधुना।

अवनिसुंदरी - (निर्वेदेन) गम्यतां यत्र कुत्रापि। विपुलेयं पृथ्वी। नार्हसि दर्शयितुं मुखमपि, यावत् पाण्डित्यं यशश्च नाधिगम्यते त्वया। गम्यताम् - गम्यताम्...। (मोहमुपगता।)

[निष्कासितो गोनन्दः खिन्नमनसा शनैः शनैः निष्क्रान्तः। करुणसंगीतम्।]

[इति प्रथमोऽङ्कः]

निवेदकः- अशिक्षितो गोपयुवा वराकः
लक्ष्यं महामात्यछलस्य जातः।
निष्कासनं प्राप्य यथा विषण्णः
तथावमानेन हि खेदमाप॥१॥
यदा निरस्तो भवनात् स पत्न्याः
कर्तव्यतामूढतया परिभ्रमन्।
अनन्यभक्तः स तु कालिदेव्याः
अनन्यभावेन हि तां प्रपन्नः॥२॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ द्वितीयोऽङ्कः ॥ प्रथमः प्रवेशः ॥

[कालीदेव्याः देवायतनम् । कालीसमीपे नतमस्तकः गोनन्दः तां प्रार्थयति ।]

गोनन्दः - कालीमातः, कृपां कुरु भक्तेऽस्मिन् । उपयोजितोऽहम् महामात्येन स्वार्थमूलके कपटनाटके । मयापि सहकृतं प्रलोभनात् प्राणभयाच्च । ज्ञात्वैतत् निष्कासितोऽहं भवनाद् भर्तृदारिकया । असंस्कृतोऽहं अनधीतोऽहं किं कुर्यामिध मातः त्वमेव मे शरणम् । वितर विद्यां प्रतिभाशक्तिं च मयि, यदभावाद् इदृशीमवस्थाम् अवमानं च प्राप्तोऽस्मि -

देवि दयावति, भवत्कृपाया
वर्षणं कुरु दीनेऽस्मिन् ।
वितरतु भवती विद्यां प्रज्ञां
प्रतिभां दिव्योन्मेषकरीम् ॥ १
यदि न करोषि कृपां जननि त्वम्
दुःखोपहतः किं कुर्याम्
त्वत्पुरतोऽहं त्यजामि प्राणान्
नाहि मे संसारे सारम् ॥ २ ॥

[सोपस्थानतो खड्गं निष्कास्य आत्मघातं कर्तुम् उद्यतः । तत्क्षण एव प्रादुर्भूतया प्रसन्नया कालीदेव्या स्वहस्तेन निवार्यते ।]

कालीदेवी - वत्स, तिष्ठ । तव अनन्यभक्त्या हम् अतीव प्रसन्नास्मि । न मे भक्तः प्रणश्यति । अलमविचारेण । त्यज

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नैराश्यम् । मम प्रसादेन अतः परं ते आत्मशक्तिजागरिता भविष्यति । ततो अविरतपरिश्रमेण त्वं सर्वविद्यापारङ्गतो दिव्यप्रातिभाज्ञानी कविश्च भविष्यसि, स्वप्रातिभाबलेन च नैकानि अनुपमेयानि काव्यानि विरचयिष्यसि, इति ते वरम् अहं ददामि । मम अनन्यभक्तस्त्वम् अतः 'महाकविकालिदासः' इति नाम्ना विश्रुतो भविष्यसि । क्षुद्रं हृदयदौर्बल्यं त्यक्त्वा, ईप्सितप्राप्त्यर्थं बद्धपरिकरो भव । कल्याणमस्तु ते । (तिरोभवति) [गोनन्दः 'कालिदासः' शनैः उत्तिष्ठति । तन्मुखात् दैन्यं नैराश्यं च शनैः शनैः अपसरति । आत्मविश्वासस्य प्रादुर्भावेन कृतनिश्चयः सः प्रतिभाति ।]

—×—

निवेदकः – अनन्यभक्तः कालीदेव्याः
गोनन्दस्तां शरणं प्राप्तः ।
लब्धो हि वरः कालीकृपया
तदात्मशक्तिः स्फुरिता दिव्या ॥
सोत्साहो विद्याध्ययनार्थम्
कृतसङ्कल्पः काशीं प्राप्तः ।
अविरतविद्याभ्यासेन ततः
शास्त्रनिपुणतां प्रातिभां प्राप्तः ॥

—×—

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

– द्वितीयः प्रवेशः –

[वाराणस्यां गुरुकुलम्। गोनन्दः 'कालिदासः' तत्र शास्त्राध्ययने निरतः। गुरुकुलाचार्यः विद्यानिधिमिश्राः तमध्यापयन्ति।]

विद्यानिधि० – शृंगारवीरकरुणाद्भुतहास्यभयानकाः।
बीभत्सरौद्रौ शान्तश्च काव्ये नवरसाः स्मृताः।
वत्स, एते नवरसाः काव्ये परिपोषिताः रसिकानाम् आनन्दं जनयन्ति। एतेभ्यः अभिप्रेतो रसः काव्ये परिपोषयितव्यः यतः रस एव काव्यस्यात्मा।

कालिदासः – आचार्य, किमेतेषु कोऽपि रसः काव्ये प्राधान्येन परिपुष्टो भवितुमर्हति?

विद्यानिधिः – वत्स, एतेषु शृंगारो वीरश्चैव काव्ये अङ्गित्वेन युज्यते।
– एक एव भवेदङ्गी शृंगारो वीर एव वा,
– तव प्रकृतिमवधाय तु चिन्तयामि यत् तव काव्ये शृंगाररसस्यैव परिपोषः सुभगतया भवेदिति।

कालिदासः – आचार्य, परितः दृष्टिपथमागच्छत्सु प्रकृतेः नैकविधरूपेषु शृंगारभावनाम् एवाहं साक्षात्करोमि। एते प्रकृतिविभ्रमाः काव्ये दर्शयितव्याः इति मे मतिः।

विद्यानिधिः – युक्तमुक्तं त्वया। निसर्गरूपाणां चित्रणं तु त्वया करणीयमेव, किंतु तेषां यत्प्रतिबिम्बं मनुजमनसि प्रादुर्भवति, तद्वर्णनं रुचिरतरं स्यात्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कालिदासः - यथाज्ञापयति आचार्यः। प्रकृतेः ऋतुविशिष्टानि रूपाणि अस्मिन्नेव क्षणे मम मनश्चक्षुषोः पुरत आविर्भवन्ति।

विद्यानिधिः - साधु साधु। वर्ण्य तावत्।

कालिदासः - आचार्य, यस्मिन् प्रचण्डसूर्यः तथा च स्पृहणीयचन्द्रमाः सः ग्रीष्मर्तुरियं दृश्यः

— दिनान्तरम्योऽभ्युपशान्तमन्मथो
निदाघकालोऽयमुपागतः प्रिये ॥

— ततश्च ग्रीष्मावसाने घनागमोऽयमिह समुपतिष्ठति --- कश्चिन्नृप इव -

— ससीकराम्भोधरमत्तकुंजरः-
तडित्पताकोऽशनिशब्दमर्दलः।
समागतो राजवदुद्धतद्युतिः
घनागमः कामिजनप्रियः प्रिये ॥

विद्यानिधिः - साधु साधु। स्पृहणीयेयं कल्पना। (स्वगतम्) प्रियामुद्दिश्यैवेयं रचना। सा वत्सस्य मनसि दृढमूला इति दृश्यते.

कालिदासः - घनागमानन्तरमेषा शरद् नववधूरिव अस्माकं पुरतः प्रादुर्भवति -

— काशांशुका विकचपद्ममनोज्ञवक्त्रा
सोन्मादहंसरवनूपुरनादरम्या।
आपक्वशालिरुचिरा तनुगात्रयष्टिः
प्राप्ता शरन्नववधूरिव रूपरम्या ॥

विद्यानिधिः - अतीव शोभनमिदं काव्यं वत्स। नववधूरिव शरदिति अतीव मनोहारिणी कल्पनेयम्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कालिदासः - आचार्य, हेमन्तस्य नवप्रवालोद्गमसस्यरम्यस्य तथा प्रमदाजनप्रियस्य शिशिरऋतोरपि मनोहारीणि रूपाणि मत्पुरत आविर्भवन्ति, ततश्चागतोऽयं ऋतुराजो वसन्तः। तस्यागमनं तु कस्यचिद् योद्धुरिव प्रतिभाति।

विद्यानिधिः - शोभनम्। वर्ण्यतां तावत्।

कालिदासः - आचार्य,

प्रफुल्लचूताङ्कुरतीक्ष्णसायको
द्विरेफमालाविलसद् धनुर्गुणः।
मनांसि वेद्धुं सुरतप्रसङ्गिनाम्
वसन्तयोद्धा समुपागतः प्रिये॥

विद्यानिधिः - अतीव रमणीयमेतत् ऋतुवर्णनं वत्स। तव प्रतिभायाः सम्प्रति सत्यत्वेन उन्मेषः दृश्यते। भवतु नाम तवेयं प्रथमा काव्यरचना, किन्त्वस्याम् अहं तव लोकोत्तरप्रतिभागुणस्य बीजानि पश्यामि। अतोऽपि रमणीयतराणि काव्यानि विरचयिष्यसीति दृढं विश्वसिमि।

कालिदासः - आचार्य, भवदनुग्रहस्यैव एतत् फलम्।

विद्यानिधिः - वत्स, आभूषणनिर्माणे सुवर्णकारस्य कश्चित् गुणो भवत्येव, किंतु मूलतः सुवर्णस्य सुवर्णत्वं तु स्पृहणीयमेव,

कालिदासः - आचार्य, मादृशे तु भवतः सुवर्णकारस्यैवाऽद् सामर्थ्यमिति मन्ये।

विद्यानिधिः - वत्स, तव काव्येन विदग्धजनास्तु

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तुष्यन्तीति न मे कोऽपि सन्देहः। किन्तु यदि सामान्यजनैः तव प्रतिभायाः साक्षात्कारः कर्तव्यः, तर्हि त्वया नाट्यस्य रचना कर्तव्या, यद् भिन्नरुचेर्जनस्य समाराधनं स्यात्।

कालिदासः - अतीव समुचितं भवद्वचनं गुरुदेव! मयापि एतदेव चिकीर्षितम्। प्रथमं तावद् ऐतिह्यात्, पुष्यमित्रशुंगसम्राजः पुत्रस्य अग्निमित्रस्य, विदर्भराजदुहितुः मालविकायाश्च प्रणयकथाम् अधिकृत्य नाट्यरचना कर्तव्येति चिन्तयामि।

विद्यानिधिः - युक्ततमोऽयं तव विचारः। श्रुतपूर्वेयं कथा जनानाम्, अतः नाट्यरूपेणापि सा जनानां परितोषाय स्यादिति मन्ये।

कालिदासः - ततश्च, आचार्य, पुरुवंशभूषणस्य पुरूरवसः, दिव्याप्सरसो उर्वश्याश्च प्रणयकथा मे द्वितीयायाः नाट्यकृतेः विषयरूपेण मां प्रतिभाति।

विद्यानिधिः - साधु। तदैते रूपके रसिकप्रिये भविष्यतः इत्येव मे मतिः। किन्तु तव प्रतिभायाः आविष्कारः तत्र पूर्णरूपेण न भविष्यतीति मन्ये।

कालिदासः - भवतोऽभिप्रायं न जानामि गुरुदेव!

विद्यानिधिः - तदेव कथयामि वत्स। महाभारतकाव्यस्य अध्ययनं तु त्वया कृतपूर्वमेव। तत्र यत् शकुन्तलोपाख्यानं विद्यते, तस्य

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

त्वया नाट्यविषयरूपेण विचारः कार्यः।

कालिदासः- (विचारमग्नतया) किन्तु गुरुदेव, तस्मिन्नुपाख्याने नायिका या शकुन्तला सा अतीव व्यवहारनिष्ठा, लोभाविष्टा च दृश्यते। नायको दुष्यन्तोऽपि असत्यवादी कर्तव्यपराङ्मुखः प्रतिभाति। एतयोः कथा रसिकाणां प्रीतये स्यान्नवेति मे संशयः।

विद्यानिधिः- (साभिप्रायम्) सत्यमुक्तं त्वया वत्स। अतः तत्रैव तव प्रतिभायाः सामर्थ्यं दर्शयितुं शक्यम्। एषा कथा तु अपरिष्कृतं रत्नमिव द्रष्टव्यम्। स्वस्य प्रतिभासामर्थ्येन त्वया सा कथा तथा परिष्करणीया, यथा सा नायिका मुग्धा, निरागाः, कन्या; नायकश्च सत्यवादी धर्मपरायणः स्यात्। तयोर्मिलनं, विप्रयोगः पुनर्मिलनं च दैवदुर्विलास एव भवेत्। यदीदं कर्तुं शक्नोषि, तर्हि तव सा नाट्यकृतिः अतुलनीया साहित्यकृतिर्भविष्यति।

कालिदासः- सत्यम् सत्यमाचार्यवर। भवत्कृपयैव एतत्कर्तुं प्रभवेयमिति मे विश्वासः।

विद्यानिधिः- कल्याणमस्तु ते वत्स। [निष्क्रान्तौ]

निवेदकः- स्वीयनवनवप्रतिभोन्मेषात्।
रुचिरं काव्यं कविर्व्यरचयत्॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ऋतुरूपाणां सुभगदर्शनम् ।
ऋतुसंहारं तेन निर्मितम् ॥
मालविकाग्निमित्रं रचितम् ।
विक्रमोर्वशीयं च नाटकम् ॥
सहृदयहृदयाह्लादकरं यत् ।
अभिज्ञानशाकुन्तलनाट्यम् ॥
लब्ध्वा विद्यां विद्यानिधितः
जातः कविरिति विख्यातः ॥

[तृतीयः प्रवेशः ।]

[तदेव स्थलम् । कतिपय वर्षाणि व्यतीतानि । कालिदासस्य गुरुकुलनिवासः समाप्यते । सः देशाटनार्थं गुरोरनुज्ञां प्राप्तुमागतः ।]

विद्यानिधिः ध्यानमग्नः निमीलितनेत्रः उपविष्टो दृश्यते । कालिदासः उपगच्छति ।

कालिदासः - प्रणमामि आचार्य ।

विद्यानिधिः - कल्याणमस्तु ते वत्स ।

कालिदासः - आचार्य, व्यतीतानि द्वादशवर्षाणि मयास्मिन् गुरुकुले । भवत्कृपया वेदवेदाङ्गानि, शास्त्राण्यपि चाधीतानि । काव्यशास्त्रमपि अधिगतम् । ऋतुवर्णनपरं ऋतुसंहारकाव्यं विरचितम् । ततश्च भवदादेशात् मया मालविकाग्निमित्रं विक्रमोर्वशीयं चेति नाटकद्वयमपि रचितम् । रसिकानां च तदाभिमतम् । किन्तु तृतीयं शाकुन्तल-नाटकं तु रसिकैः शिरसि धारितम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विद्यानिधिः- वत्स, भृशं प्रमुदितं मे चेतः दृष्ट्वा तव प्रातिभोन्मेषम्।

कालिदासः - आचार्य, सर्वमेतद् भवदनुग्रहेणैव सम्पादितं मया। भवदृणस्य निष्कृतिः नैव शक्येति मन्ये।

विद्यानिधिः - विद्यादानं मे कर्तव्यमेव वत्स। प्राज्ञेषु तथा जडेष्वपि छात्रेषु विद्या वितीर्यते मया। किन्तु त्वत्सदृशः सच्छिष्य एव विद्यां सफलतां नयति।

-प्रभवति मणिर्बिम्बग्राहे पुनर्न मृदां चयः।

कालिदासः - अतीवानुगृहीतोऽस्मि आचार्य।

विद्यानिधिः - वत्स, तवात्र निवासोऽधुना समाप्तिं यातः। तर्हि किं चिकीर्षितं त्वया भविष्यति?

कालिदासः - आचार्य, पुराणेषु, लोककथासु वा येषां चरित्रमुपवर्णितं, तान् महापुरुषान् अधिकृत्य महाकाव्यानि रचयितुम् इच्छामि। तदर्थं देशाटनं कृत्वा किंचित् अनुभवग्रहणं चिकीर्षितं मया। तेन च भाविकाव्यरचनासु वास्तविकता सम्भवेदिति मे मतिः।

विद्यानिधिः - शोभनम्। कुत्र नु गन्तुमीहसेऽधुना?

कालिदासः - आचार्य - दक्षिणस्यां दिशि प्रस्थानं करिष्यामि। प्रथमं तावद् अवन्तिदेशं प्राप्य, ततोऽन्यत्र गमिष्यामि।

विद्यानिधिः - (स्वगतम्) अवन्तिदेशं नाम। तर्हि

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्वभूतार्थः अद्यापि कृन्तति अस्य हृदयम्।
(प्रकाशम्) वत्स, अवन्तिदेशे अवन्तिसुंदर्याः
शासनमिति श्रूयते। द्वादशवर्षपूर्वं तस्याः
कलानिपुणायाः विदुष्याः विवाह केनापि
गोपयुवकेन सह जातः। महामात्यस्य
कुटिलनीतेस्तत् फलमित्यपि श्रुतम्।
प्रथमरात्रौ रहस्यभेदात् तया स्वभर्ता
गृहान्निष्कासितः इति वार्तापि कर्णपथम्
आगता।

कालिदासः - सत्यमेवैतद् गुरुदेव।

विद्यानिधिः - वत्स, कथमेतद् जानासि त्वम्?

कालिदासः - (स्वगतम्) हन्त! किं कथयामि ननु!
लज्जितोऽस्मि खलु रहस्यगोपनात्।
अधुना तु सत्यं वक्तव्यमेव।
(प्रकाशम्) क्षन्तव्योऽहं गुरुदेव।
यतः स्वविषये पूर्वं किमपि न
कथितं मया। आचार्य, अहमेव
स दैवहतः गोपयुवा नाम। ततः
अवमानाद् विषण्णोऽहं कालीमातायाः
आराधनां कृतवान्। प्रसन्नया तया
दत्तवरोऽहं आत्मशक्तिं प्राप्यात्र
अध्ययनार्थमागतः। तदुत्तरं तु
गुरुदेवः जानात्येव।

विद्यानिधिः - वत्स, सर्वमेव भूतार्थं जानाम्यहम्।
तव गुरुकुलप्रवेशानन्तरं कश्चित् श्रमणकः
अवन्तिदेशात् आगतोऽत्र।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अत्र सम्प्राप्त: इति मन्ये। तेनैव हेतुना स: अवन्तिनगरीमागत: इत्येतत् स्पष्टमेव। [नेपथ्ये जयशब्द: श्रूयते – 'कविकुलगुरु: कालिदासो विजयतां' 'जयतु कविराज:।' इत्यादि।]

अवन्तिसुन्दरी – मदनिके, कोऽयं कोलाहल: श्रूयते? कविराज: सम्प्राप्तो नु?

मदनिका – (मेघडम्बरीत: पश्यन्ती) अथ किम्। भवति, कविराज एव राजवीथ्यां गच्छन् दृश्यते। हृष्टचेतसो नागरिकास्तं पुष्पमालाभि: सम्मानयन्ति। जयशब्दं च कुर्वन्ति। (दृष्ट्वा) स एव स्मितवदनो कविराज: दृष्ट: अधुना। किमेतद् परिवर्तनं पश्यामि। अहो रमणीयं रूपम्। अहो वैभवम्।

अवन्तिसुन्दरी – (स्वगतम्) हृदय, किमुत्ताम्यसि? धीरं भव। सिध्यति ते चिरकांक्षितम् अचिरादेव। (प्रकाशम्) मदनिके, कुत्र नु खलु भर्ता प्रतिष्ठते?

मदनिका – (विलोक्य) भट्टिनि, प्रासादोन्मुख एव कविराज: दृश्यते। वर्धस्व देवि, सफलं ते तप:। अवसिता ते प्रतीक्षा। अयमार्य अत्रैवागच्छति। स्वागतार्थं सज्जा भव।

अवन्तिसुन्दरी – (स्वगतम्) दिष्ट्या सफला मे मनोरथा: (साशङ्कम्) कथं नु मया सह

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्यवहरेदार्य:? रोषेण, प्रीत्या वा?
क्षमितो वा मम पूर्वापराध:? आशङ्का
व्याकुलयति मे मानसम्। (प्रकाशम्)
मदनिके, सम्भ्रान्तास्मि खलु सम्प्रति।

मदनिका - भट्टिनि, अलं सम्भ्रमेण। भवती खलु
राज्यस्वामिनी। तत्सदृशं व्यवहर्तव्यम्।
न युक्तं विकारदर्शनम्।

अवन्तिसुन्दरी - (स्वस्थचित्ता भूत्वा) हला मदनिके,
युक्तमुक्तं त्वया। तदेवानुतिष्ठामि। त्वं
तावद् अन्तर्गृहे तिष्ठ।

मदनिका - यथाज्ञापयति भट्टिनी [निष्क्रान्ता]
[जयशब्द: निकटवर्ती श्रूयते। 'कवि-
-कुलगुरु: कालिदासो विजयते।' इति।
तत: प्रविशति नैकाभि: पुष्पमालाभि:
शोभितकण्ठ: कालिदास:।]

कालिदास: (प्रविश्य स्वगतम्) अस्मिन् प्रासादे
पदन्यासात् मत्पुरत: मूर्तिमान् इव स भूतार्थ:।
(अवन्तिसुंदरीं निर्वर्ण्य) अस्यां किमपि
परिवर्तनं न प्रतीयते। सर्वे बन्धास्तु तदैव
खण्डिता अनया। अधुना तु केवलम्
उपचारेणैव व्यवहर्तव्यम्। (प्रकाशम्)
जयतु देवी। राज्याधीश्वरीं कालिदासोऽयं
प्रणमति।

अवन्तिसुन्दरी - (स्वगतम्) कथं राज्याधीश्वरीति संबोधनम्?
(प्रकाशम्) आर्य, किमर्थमियम्
औपचारिकता? प्रथमं तावदहं भवत:

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पत्नी तदनन्तरमेव राज्याधीश्वरी अस्मि।

कालिदासः - (स्वगतम्) रज्जुर्बलिता, तस्या वलितमपि सम्प्रति शिथिलमिव पश्यामि। (प्रकाशम्) नैव तथा, भवति, पत्नी तु पूर्वमासीत् भवती। मम तदा निष्कासनात् स बन्धः खण्डितः एव। अधुना तु भवती केवलम् अवन्तिराज्ञी इत्येव अवधारयामि।

अवन्तिसुन्दरी - आर्य, सत्यं, निराशायाः उद्वेगभरान्न च पूर्वं निष्कासितो भवान् भवनात् मया। तदनु भृशं पश्चात्तप्ता अहम्। तदर्थम् अद्यावधि रुष्टो नु भवान्?

कालिदासः - आर्ये, रोषः किमर्थम् स्यात्? निष्कासनं तु भवत्याः अनुग्रह एव, इति मन्ये।

अवन्तिसुन्दरी - आर्य, अलमुपरोधेन। पूर्वमेव दुःखिताहं नाधिकं दूयितव्या भवता।

कालिदासः - आर्ये, यदि दुःखिता, तर्हि भवत्येव तत्कारणम्। अन्यच्च, ममैतद् वचनं नैव उपरोधपरम्।

अवन्तिसुन्दरी - आर्य, कथं तर्हि निष्कासनम् अनुग्रह इत्युच्यते?

कालिदासः - आर्ये, ननु तेनैव कारणेन खल्वहं कालिमातायाः कृपाभाजनं जातः। विद्वत्त्वं कवित्वं चाधिगतवान् अस्मि।

अवन्तिसुंदरी - (स्वगतम्) काचिद् आत्मश्लाघास्मिन् वचने प्रतीयते। तत् पश्याम्यस्य प्रतिभाविलासम् नाम। (प्रकाशम्) आर्य

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रुतपूर्वा मया भवतः कीर्तिः। ननु आस्ति तावद् अस्मत्कृते कापि नूतना रचना? आस्ति कश्चिद् वाग्विशेषः?

कालिदासः - (स्वगतम्) प्रेमिका अधुना विदुषी आस्ति संवृत्ता। तर्हि प्रतिभाविलासमेव दर्शयामि,

अवनिसुन्दरी - (सस्मितम्) आर्यस्तावद् विचारमग्नः इव दृश्यते।

कालिदासः - (विहस्य) नैवेदं तथा, भवति। विचारस्तु अयमेव, यत् पूर्वरचितात् वाग्विशेषात्, कर्तव्या कापि अभिनवैव काव्यरचनेति।

अवन्तिसुन्दरी - (आश्चर्येण) किं नूतना रचनेति? किमधुनैव क्रियते?

कालिदासः - अथ किम्। 'आस्ति कश्चित् वाग्विशेषः' इति भवत्याः प्रश्नगतानि पदान्येव अनुसृत्य, अधुनैव नूतनां काव्यरचनां करोमि।

अवन्तिसुंदरी - (आश्चर्येण सकौतुकम्) प्रश्नपदानुसारिणी काव्यरचना अधुनैव क्रियते ननु?

कालिदासः - एवमेव भवति, शिवपुत्रकार्तिकेयस्य सम्भूतिमधिकृत्य महाकाव्यं चिकीर्षितं मया। तस्यारम्भमेव 'अस्तीति प्रश्नगतेन प्रथमपदेन करोमि—

अस्त्युत्तरस्यां दिशि देवतात्मा
हिमालयो नाम नगाधिराजः।
पूर्वापरौ तोयनिधी वगाह्य
स्थितः पृथिव्या इव मानदण्डः॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अवन्तिसुन्दरी - (आदरेण) अहो शीघ्रकवित्वम् । रचनायाश्च सुभगत्वम् । 'पृथिव्याः मानदण्डः हिमालयः' इतीयं भव्या कल्पना ।

कालिदासः - भवति, कश्चिद् विरही यक्षः घनागमे विरहव्याकुलः दूरस्थां प्रियतमां प्रति मेघमेव दूतरूपेण प्रेषयतीति अपूर्वा कल्पना, अस्मिन्नेव क्षणे मम मनसि प्रस्फुरिता । अतः 'कश्चित्' इति प्रश्नस्य द्वितीयपदेन मेघदूतकाव्यस्य प्रारम्भः क्रियते मया —

कश्चित्कान्ताविरहगुरुणा स्वाधिकारात्प्रमत्तः
शापेनास्तङ्गमितमहिमा वर्षभोग्येण भर्तुः ।
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु ॥

अवन्तिसुन्दरी - (हर्षेण) अहो अपूर्वत्वं कल्पनायाः सौन्दर्यं च रचनायाः । कविशिरोमणे, भवतः एतद् काव्यं सहृदयैः शिरसि धारयिष्यते, इति विषये न मे कोऽपि सन्देहः ।

कालिदासः - भद्रे, भवत्याः प्रश्नस्य एकं पदमवशिष्टम् सूर्यकुलोद्भवं रघुवंशं वर्णयितुं यत्काव्यं मया चिकीर्षितं, तस्य प्रारम्भः 'वागिति' पदेनाधुना क्रियते मया —

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥

अवन्तिसुन्दरी - (अतीवादरेण वक्तुं न प्रभवति) - आर्य,

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रणमामि भवतः प्रतिभाशक्तिम्। अहो कवित्वम्। अहो प्रतिभाविलासः। भर्तः, लज्जितास्मि खलु, यद् भवतोऽर्हतां न अभिज्ञातवती पूर्वमहमिति। निष्कासितो भवान् भवनात् मया। अपराधिनी अहं, तदाप्रभृति अहर्निशम् अनुतप्यमानास्मि। अतः त्वया क्षन्तव्याहम् अत्रभवतेति प्रार्थये। नेच्छामि राज्यमिदम्। न चेदं वैभवम्। भवच्चरणावेव मे शरणम्। (पादयोः पतति।)

कालिदासः – शान्तं पापम्। नैतदुचितम् आर्ये। अलं क्षमायाचनया। पूर्वमेवोक्तं मया, यद् भवत्या एव कारणाद् ईदृशं यशः विद्वत्तां काव्यप्रतिभां चाधिगन्तुं शक्तोऽहमिति। अतः त्वं मे गुरुस्थाने भवितुमर्हसि। गुरुरिति अत्यादरेण प्रणमाम्यहम् अत्रभवतीम्, किन्तु पत्नीरूपेण भवत्याः स्वीकरणमसम्भवमेव, क्षन्तव्योऽहं भवत्या।

अवन्तिसुन्दरी – मा मैवं कथयतु नाथः। अपराध-क्षमापनेन भवान् मां पत्नीत्वेन स्वीकुर्यादिति इत्याकाङ्क्षयैव इयत्कालपर्यन्तं प्रतीक्षितं मया। अधुना तु भवतः एतेन कठोरवचनेन मम मनोरथेषु वज्रपात इव संजातः। भवतो गुरुस्थानम् अधिष्ठातुं नैवार्हामि अहम्। स्वीकरणेन सनाथीकरोतु भवान्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जायामिति प्रार्थये।

कालिदासः - (दृढतया) सर्वथैव असम्भवमिदं भवति। न मयैतद् रोषेणोच्यते। पूर्वमावयोः विवाहसमये न कोऽपि तादृशः भावबन्धः समुत्पन्नः। तत्पूर्वमेव भवत्याहं निष्कासितः। अतः भवत्याः पत्नीत्वेन स्वीकरणमधुना आत्मवञ्चनमेव स्याद् मे। अत एव पुनरपि भवतीं गुरुरूपिणीमेव वन्देऽहम्, किन्तु पत्नीरूपेण स्वीकरणमसम्भवमेव। तत्कृते क्षन्तव्योऽहमत्र भवत्या।

अवन्तिसुन्दरी - (निराशया रुदन्ती) (स्वगतम्) अयि दैवहतक। कामपि आशां दर्शयित्वा पुनरपि निष्ठुरं प्रहृताऽस्मि त्वया। इयत्याः प्रतीक्षायाः अनन्तरम् इदमपि सोढव्यं मया! (प्रकाशम् तीव्रस्वरेण) भोः कविवर, स्वकाव्येषु तु भवता प्रेमभावना नितान्तरमणीयतया वर्णिता दृश्यते। स त्वं मम विषये कथमीदृशो निष्ठुरो भवितुमर्हसि? दाम्भिकः खलु भवान् यः अविगणयसि मम प्रेमभावनाम्। (निराशया क्रोधेन च) शपामि खलु त्वां, यत् मम प्रेमणः अस्वीकारं कुर्वतः तव मृत्युरपि स्त्रीकारणादेव भवेदिति। स्त्रीकारणादेव भवेदिति। [संमुचितं सङ्गीतम् यत् प्रसङ्गस्यैतस्य परिणामं वर्धयेत्।] (स्वगतम्) इतः परम्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तव नामजप एव मे भागधेयम्।
[निराशाकुलिता रोदिति]

कालिदासः — (स्वगतम्) क्रोधोद्वेगेन शप्त्वा मां, पुनरपि दण्डितोऽस्मि अनया। (निःश्वस्य) भवतु। इयमेव मे भवितव्यतास्ति। सत्यमेवोक्तं आचार्येण। अत्रागत्य दुःखमेव प्राप्तोऽहम्। (प्रकाशम्) भवति, अयमपि भवत्याः अनुग्रह एवेति मन्ये। अत्रभवती मया गुरुस्थाने स्थापिता, अतः गुरोः शापमपि तावद् अनुग्रहरूपेणैव स्वीकरोम्यहम्। स्वस्ति भवत्यै। साधयामि तावत्। [निष्क्रान्तः]

———→———

। इति द्वितीयोऽङ्कः।

निवेदकः — कथं विचित्रा दैवगतिः
घटतेऽतर्कितमिह जगति।
प्रेम तस्य साफल्यं नैति
प्रेमकवेरेषा नियतिः॥१॥
कविगोष्ठीषु स्वकाव्यगानम्
गणिकावर्गे स्नेहबन्धनम्।
प्रेमभावना तृष्णाशमनम्
तेन मार्गितं मृगजलसदृशम्॥२॥
नगाधिराजसमीपे तेन
रचितं कुमारसम्भव काव्यम्
मेघदूत रचना घनागमे
रघुवंशं शब्दार्थसङ्गमे॥३॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कुमारदास वयस्येन ततः
सिंहलद्वीपनृपेणाहूतः
काव्यनृत्यसङ्गीत हेतुतः
गणिकागेहं प्रथमं प्राप्तः ॥ ४ ॥

[तृतीयोऽङ्कः] प्रथमः प्रवेशः।

[सिंहलद्वीपम् । तत्रैकास्मिन् गणिकावेश्मनि कालिदासः आगतः । तत्र गणिका चतुरिका नृत्यगीतकार्यक्रमे व्यस्ता । आसने उपविष्टः कालिदासः अन्यैः नागरकैः सह नृत्यगीतरसानन्दम् अनुभवति । गणिका चतुरिका स्वसख्या गीयमानं ऋतुगीतम् संगीतं चानुसृत्य नृत्यमनुतिष्ठति ।

- नृत्यगीतम् -

सखी - पक्वशालितनुगात्री
काशवसनभूषिता
नीलोत्पलनयनयुता
विकचपद्ममुखयुता
रूपरम्यदर्शना
शरद्वधूः समागता ॥१

मुदितहंसकलरवेण
कृतनूपुरशिञ्जिता
ज्योत्स्नांशुकशोभिता
तारागणमण्डिता
रूपरम्यदर्शना
- शरद्वधूः समागता ॥२॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

फुल्लकमलगन्धिता
शीतपवनरञ्जिता
विमलकिरणतेजसा
इन्दुना विराजिता
रूपरम्यदर्शिना
शरदवधूः समागता ॥३॥

[नृत्यावसाने नागरकाः करतालध्वनिना चतुरिकाम् अभिनन्दन्ति। कालिदासं विना सर्वे नागरकाः निष्क्रान्ताः। गणिका चतुरिका कालिदासं प्रणमति।]

चतुरिका - प्रणमामि आर्यमिश्रम्। अदृष्टपूर्वो आर्यपुत्रोऽस्मिन् नगरे। अतः दूरदेशात् आगत इति तर्कयामि। कस्मात् देशात् आगमनं भवतः, किं वा शुभनामधेयम् इति ज्ञातुमिच्छामि।

कालिदासः - (स्वगतम्) कोऽपि न जानाति मामत्र अन्ते मित्रकुमारसेनात्। अतः स्वपरिचयं दातुं नैव युक्तमिति मन्ये। (विचिन्त्य) बाढम्, एवं भणामि। (प्रकाशम्) भद्रे, तुहिनांशुः सार्थवाहः इति मे नामधेयम्। अतः उत्तरतो विद्यमानात् भारतदेशाद् आगतोऽस्मि अहम्। वाणिज्यं मे वृत्तिः, काव्यरचना च मे रुचिविषयः। नृत्यगीतेषु रुचिं धारयामि अत एवात्र आगमनं भवत्याः सदनम्।

चतुरिका - आर्य, किं मम नृत्यगीतं भवतः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

परितोषाय वेति ज्ञातुमिच्छामि।

कालिदासः - अतीव रुचिरं भवत्याः नृत्यम्, तदनुषङ्गि गीतं च। किन्तु भवति, एतद् नृत्योपयुक्तं ऋतुगीतं तु परिचितमिव मे प्रतिभाति।

चतुरिका - (स्मितपूर्वकम्) युज्यते आर्य। भारतीयस्यैव कस्यचित् कविवरेण्यस्य कालिदासस्य कृतिः ऋतुसंहारम् नाम काव्यं भवता श्रुतपूर्वमेव स्यात्। अतीव प्रतिभाशाली कविवरः सः। तस्य ऋतुसंहारकाव्ये यत् शरद्वर्णनं तदनुसारं रचितमिदं नृत्यानुकूलं गीतम्।

कालिदासः - (स्वगतम्) ननु अस्मिन्नपि देशे कालिदासः तस्य काव्यं चापि बहुमन्यते इतीदं मे अतीव संतोषास्पदम्। भवतु! इदानीं तावत् कृतकनाम्ना एव वर्तितव्यम्। (प्रकाशम्) भद्रे, जानाम्यहं कालिदासकविं तस्य काव्यमपि च। अत एव नूनमिदं काव्यं परिचितं प्रतिभाति।

चतुरिका - आर्य, भवादृशस्य सहृदयस्य भारतीयस्य आगमनेन महान् मे प्रमोदः। अस्माकं भर्ता सिंहलराजः कुमारदासः खलु कालिदासस्य मित्रम्। सम्प्रति काव्यरसिकेन महाराजेन एका समस्यापूर्तिस्पर्धा आयोजितास्ति।

कालिदासः - (कुतूहलेन) एवं नु? का नाम समस्या उपस्थापिता महाराजकुमारदासेन?

चतुरिका - समस्या तु ईदृशी आर्य।
- कमले कमलोत्पत्तिः श्रूयते न तु दृश्यते।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कालिदासः - साधु साधु। सुष्ठु निर्मितेयं समस्या।
- कमले कमलोत्पत्तिः श्रूयते न तु दृश्यते।
(अक्षिणी निमील्य स्वगतम्) कमले ....
कमलोत्पत्तिरिति ...आम् - एवमेव। (प्रकाशम्)

चतुरिका - आर्य, समस्यां श्रुत्वा विचारमग्नो दृश्यसे। भृशं प्रयतमानाप्यहम् अस्याः समस्यायाः समाधानं कर्तुं न प्राभवम्।

कालिदासः (अक्षिणी उन्मील्य) भद्रे, सुकरम् अस्याः समाधानम्। ननु ईदृशं भवेत् -
- बाले तव मुखाम्भोजे कथमिन्दीवरद्वयम्।

चतुरिका - अतीव शोभनमेतत् समाधानम् आर्य। मुखाम्भोजे इन्दीवरद्वयसदृशं लोचनयुगमम् इति समुचितं समाधानम्। अत्रभवांस्तु कालिदासेन तुल्यः प्रत्युत्पन्नमतिः कविरिति अवधारयामि। सत्यम्, अतीव समुचितेयं समस्यापूर्तिः।

कालिदासः - अपि शोभनेयं समस्यापूर्तिः? तर्हि अहमेव तावदेतां श्व एव महाराजम् उपसृत्य, राजसभायां पठिष्यामि। जानातु सोऽपि भारतीयस्यैकस्य प्रतिभाशक्तिम्।

चतुरिका - (हतोत्साहम्) किं भवान् स्वयमेव राजसभायाम् एतां पठिष्यति? (विचार्य) अथवा युक्तमेव एतत्। भवानेव पारितोषिकमर्हति। (स्वगतम्) हन्त। इयं समस्यापूर्तिः मया किं न विरचिता?

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मन्दभागिनि चतुरिके, छिन्नं तव हस्तात् पारितोषिकम्। तदनुसारि ते बहुकांक्षितम् राजनर्तकीपदमपि गतमेव। किमत्र कुर्याम्? इदं काव्यं ममैवेति कथनीयम्। किन्तु मम इष्टसिद्धिमार्गे अयं पथिक एव कण्टकः किमिति, तं निरस्य इष्टं न साधयितव्यम्? (विचार्य) भवतु। एवमेव कार्यम्। (प्रकाशम्) आर्य, भवतः अद्भुतप्रतिभा-विलासेन द्विगुणितो मे आदरो भवद्-विषये। अतोऽहं प्रार्थये यद् अत्रैव भवता विश्रामः कार्यः, यावत् प्रभातसमयः। ततस्तु राजसभां गत्वा काव्यं पठनीयम् यदि भर्ता सन्तुष्टः, तर्हि पारितोषिकमपि अधिगन्तव्यम्।

कालिदासः - (स्वगतम्) हन्त। कीदृशीयं आतिथ्यशीलता एतद्देशवासिनाम्। अज्ञातपथिकोऽपि मादृशः आश्रयं लभते। (प्रकाशम्) भद्रे भवत्या आतिथ्येन अतीव उपकृतोऽस्मि अधुना अतीव श्रान्तोऽस्मि। अतः अत्रैव पर्यङ्के मुहूर्तं विश्राम्यामि।

चतुरिका - आर्य, अनुगृहीतास्मि। सुखेनैवात्र विश्रामः कार्यः। (स्वगतम्) दिष्ट्या सफलो मे मनोरथः। यावदयं सुप्तः, तावत् कुम्भीलकमाहूय घातयाम्येनम्। ततः अविलम्बेन अस्य दाहसंस्कारमपि कारयामि किरिन्दीतीरे। अज्ञातोऽयं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पथिक इति केनाऽपि न ज्ञायेत. तस्य अनुपस्थितिः। ततः प्रभाते महाराजसकाशं गत्वा समस्यापूर्तिं पठामि। पारितोषिकं ततश्च राजनर्तकीपदमापि ध्रुवं प्राप्स्यते। साधु चतुरिके, साधु। स्वनामसदृशम् आचरितं त्वया। (प्रकाशम्) सुखं स्वपिहि आर्य। (निष्क्रान्ता।)

[रङ्गमञ्चे शनैः शनैरन्धकारः। एकस्मिन् कोणे चतुरिका स्वहस्तकं कुम्भीलकं प्रति मूकनाट्येन संवदति। सुप्तं कालिदासं निर्दिश्य तस्य हत्यां सूचयति, हस्तस्थितं सुवर्णमुद्रास्यूतं च ददाति। कुम्भीलकः खड्गमुद्यम्य कालिदासं प्रति गच्छति शस्त्राघातं च करोति। सुप्तः कालिदासः उच्चैः आक्रन्द्य प्राणत्यागं करोति। प्रसङ्गानुसारिणी करुणसङ्गीतयोजना]

— द्वितीयः प्रवेशः —

[प्रभातकालः। सिंहलराज-कुमारदासस्य प्रासादः कक्षे उपविष्टः कुमारदासः। अमात्यो जयवर्धनः प्रविशति]

जयवर्धनः - जयतु महाराजः।

कुमारदासः - स्वस्त्यस्तु ते अमात्यवर।

जयवर्धनः - भर्तः, अद्यावधि सम्प्राप्तासु समस्यापूर्ति-काव्येषु किंचिदपि भवतो नाभिमतम् इति मन्ये,

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

किं तत्र न कोऽपि प्रतिभाविलासो दृष्टः महाराजेन?

कुमारदासः - न तत्र कोऽपि विशेष इति मे अभिप्रायः। [गणिका चतुरिका प्रविशति]

चतुरिका - जयतु जयतु भर्ता।

कुमारदासः - स्वस्त्यस्तु ते। चतुरिके, किमर्थं प्रातरेव अस्माकं दर्शनं प्रार्थितं त्वया?

चतुरिका - तादृशमेव किञ्चित् विशेषकारणं भर्तः। भवतो समस्यापूर्तिविषये सततम् चिन्तयन्त्या मे प्रातरेव काचिदभिनवा कल्पना स्फुरिता। कृता च मया भवतः समस्यायाः पूर्तिः। तामहम् अविलम्बेन भर्तारं श्रावयितुं सम्प्राप्तास्मि।

कुमारसेनः - तव प्रफुल्लेन मुखकमलेन तु पूर्वमेव सूचितं यत् किमपि विशेषं कारणमिति। श्राव्यतां तावत् समस्यापूर्तिः।

चतुरिका - अनुगृहीतास्मि भर्तः। भवतोपस्थापिता समस्या भवति -

— कमले कमलोत्पत्तिः श्रूयते न तु दृश्यते,

-तस्याः पूर्तिस्तु एवं भवितुमर्हति।

— बाले तव मुखाम्भोजे कथमिन्दीवरद्वयम्।

कुमारदासः - साधु, चतुरिके साधु। सुभगेयं कल्पना। मुखं कमलं, तस्मिन् इन्दीवरसदृशं नीललोचनद्वयमिति समुचितेयं समस्यापूर्तिः। अपूर्वं मेधावित्वं तथा च प्रतिभाविलासश्चास्मिन् काव्ये पश्यामि।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्मारयाति स खलु मां प्रियवयस्यं कालिदासम्
कुत्र नु भवेत् सः सम्प्रति? मयाहूतोऽपि
नाद्यापि सम्प्राप्तः सः आस्मिन् देशे।
भवतु। अमात्य जयवर्धन, समस्यापूर्तिविषये
भवतोऽभिप्रायं ज्ञातुमिच्छामि।

जयवर्धनः – (विचारमग्नतया) महाराज, एतद्विषये
रहसि किञ्चित् वक्तुमिच्छामि।
[साभिप्रायं चतुरिकां पश्यति।]

कुमारदासः – (तदभिप्रायं ज्ञात्वा) तथा भवतु। चतुरिके,
त्वं तावद् अन्यस्मिन् कक्षे प्रतीक्षस्व,
यावद् आवां मन्त्रयावः।

चतुरिका – यथाज्ञापयति भर्ता। [निष्क्रान्ता]

कुमारदासः – अमात्य, उच्यतामधुना यद् विवक्षितम्।

जयवर्धनः – महाराज, चतुरिकया पठितं काव्यं
तु उत्कृष्टमेव असंशयम्। किन्तु अत्र
कश्चित् संशयो मे मनसि। एतादृशं
बुद्धिवैभवं प्रतिभा च चतुरिकायां
न दृष्टपूर्वा।

कुमारदासः – नैतद् वक्तुमुचितम् अमात्य। प्रतिभायाः
उन्मेषस्तु कदापि, कस्यापि भवितुं
शक्यते।

जयवर्धनः – युक्तमुच्यते महाराजेन। किन्तु अन्यदपि
अस्ति कारणं मम संशयस्य। ननु
समस्यापूर्तेः श्लोकार्धस्य रचनातः
स्पष्टं भवति यत् केनापि पुरुषेण
कामपि स्त्रियमुद्दिश्य विरचितोऽयमिति।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

बाले' इति सम्बोधनपदम् एतत्सूचयति ।
कुमारदासः - (विचार्य) अमात्य, समीचीनं भवद्वचनम्, तेन च ममापि मनसि संशयः प्रादुर्भूतः । आहूय पुनः पृच्छामि तावद् चतुरिकाम् । ननु समस्यापूर्तिविषये अपरा समस्येयं समुद्भूता ।

[राजपुरुषः तीक्ष्णायुधः प्रविशति ससम्भ्रमम्]

तीक्ष्णायुधः - (प्रविश्य) जयतु भर्ता ।
कुमारदासः - स्वस्त्यस्तु ते । तीक्ष्णायुध, का वार्ता? उच्यतां किं ते सम्भ्रमकारणमिति ।
तीक्ष्णायुधः - भर्तः, मातरप्रदेशे किरिन्दीतीरे श्मशानभूमौ मृतपथिकस्य कस्यापि दाहसंस्कारः अनुष्ठीयते । चतुरिकायाः गणिकायाः हस्तकः कुम्भिलकस्तस्मिन् कर्मणि प्रवृत्तः इति श्रुतमस्माभिः । हत्याशङ्कया निरुद्धमस्माभिस्तत्कार्यम् । अधुना किं तत्र कर्तव्यमिति भर्तुः आदेशः प्रार्थ्यते ।
कुमारदासः - हन्त । किमेतत् श्रूयते मया अमात्य? शान्तिप्रिये अस्माकं राष्ट्रे अभूतपूर्वेयं घटना । तदन्विष्यतां तत्कारणम् ।
जयवर्धनः - यथाज्ञापयति महाराजः । किन्तु सम्प्रति इदं तर्कयामि । अस्माकं समस्यापूर्तिविषये प्रथमा समस्यास्ति, यत् चतुरिकया पठितं काव्यं तया रचितं न वेति । द्वितीया समस्या तु ईदृशी । यत् न तच्चतुरिकायाः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तर्हि कस्तस्य रचयितेति। कुतश्च तया तत्प्राप्तमिति च। अधुना तु तृतीया समस्येयं समुपस्थिता, यत् कोऽयं मृतपथिकः, यस्य शवं गणिकाहस्तकेन कुम्भीलकेन दह्यते। एताः सर्वाः समस्याः परस्पर-सम्बन्धिन्यः स्युरिति मे मतिः।

कुमारदासः - तत्कथमिव अमात्य?

न्यायवर्धनः - शृणोतु महाराजः। मृतपथिकस्य निभृतं दाहसंस्कारं चिकीर्षुः कुम्भीलकः गणिकायाः चतुरिकायाः हस्तकः। अतः मृतपथिकेन सह चतुरिकायाः सम्बन्धः सम्भवति। अथ यदि केनापि घातितः पथिकः, तर्हि सः चतुरिकया एव स्यात्, किं कारणं स्यात्? द्रव्यलोभ एव स्यात् द्रव्यं कुतः सम्भवति। समस्यापूर्ति-पारितोषिकात्, यदर्थं चतुरिका प्रयतमाना काव्यं पठितवती। तत्काव्यं तु न तस्याः कृतिरिति स्पष्टमेव। अतः तत् पथिकेनैव रचितं स्यात्। तस्य घातेन चतुरिका तत्काव्यं स्वीयमिति दर्शयित्वा पारितोषिकं प्राप्तुं शक्नुयात् अतः अनया तर्कपरम्परया इदं सिध्यति, यत् चतुरिकया पारितोषिकधनलोभवशात् कश्चित् प्रतिभाशाली कविर्घातितः। तस्य काव्यं च समस्यापूर्तिरूपेण स्वीयमिति पठितं भर्तुः पुरतः, पारितोषिकलाभार्थम्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कुमारदासः - साधु, अमात्य, साधु। निर्दोषेयं भवतः तर्कपरम्परा। हन्त। कीदृशीयं निर्घृणता गणिकायाः। एषापराधिनी ध्रुवं दण्डयितव्या सा स्माभिः। कः कोऽत्र भोः? प्रत्यन्तां प्रतीक्षन्ती चतुरिका।

[चतुरिका प्रवेश्यते प्रातिहारिणा]

चतुरिका - जयतु भर्ता।

कुमारदासः - चतुरिके, त्वयाधुना समस्यापूर्तिकाव्यम् पठितं ननु?

चतुरिका - अथ किम्। प्रातरेव रचितम्, त्वरितमेव पठितं भवत्पुरतः।

कुमारदासः - (कठोरस्वरेण) प्रातरेव रचितं ननु? चतुरिके, सत्यं वद। कस्यैतत् काव्यम्?

चतुरिका - (स्वगतम्) हन्त। महाराजस्य कोऽपि संशयः संजातः। (प्रकाशम्) भर्तः विश्वसितव्यं मे वचनम्। ननु ममैव इयं रचना।

जयवर्धनः - चतुरिके, ह्यः भवत्याः सदनेऽनुष्ठिते नृत्यगीतिप्रसङ्गे अप्यासीत् कोऽपि पथिक उपस्थितः?

चतुरिका - (स्वगतम्) हन्त। यस्याशङ्का तदेव आपतितम्। (प्रकाशम्) आर्य, आसीत् कोऽप्येकः पथिक उपस्थितस्तत्र। नृत्यावसाने स तु निर्गतः।

जयवर्धनः - निर्गतः? (कठोरतया) कुत्र गतः? स्वर्गं वा प्रेषितस्त्वया? स्वकाव्यं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तुभ्यं समर्प्य गतो वा? सत्यं वक्तव्यं त्वयाधुना चातुरिके।

चातुरिका - (भयेन) किमिदम् उच्यते आर्येण? सत्यमेव पथिकः निर्गतः। समस्यापूर्तेः काव्यं तु ममैव, न पथिकस्य।

जयवर्धनः - चातुरिके, अलमलीकेन। तस्य पथिकस्य शवमधुना 'कलिन्दीतीरे' दाहसंस्कारं प्रतीक्षते। दाहसंस्कारे तु तव हस्तकः कुम्भीलकः प्रवृत्तः इति श्रूयते। अतः त्वमेव तस्य मृत्योः कारणमिति स्पष्टम्। एतदेवं, न वा?

चातुरिका - (स्वगतम्) हन्त। निष्फला कुम्भीलकस्य योजनेति प्रतीयते। किं कथयामि सम्प्रति? नान्या गतिः। सत्यमेव वक्तव्यम्, क्षमा च याचयितव्या। (प्रकाशम् भयेन रुदन्ती) क्षम्यतां महाराज, अपराधिनी अहम्। पारितोषिकद्रव्यलोभात् मयैव घातितः स पथिकः। तस्यैव काव्यं पठितं भवत्पुरतः स्वीयमिति समस्यापूर्तिरूपेण। द्रव्यलोभादेव स्खलनं मे। क्षम्यतां महाराज, क्षम्यताम्।

कुमारदासः - (क्रोधेन) निर्दयगणिके, रूपं ते सुभगम् अप्सरस इव, हृदयं तु क्रूरं वृकस्येव। शतवारं वधदण्डोऽपि तवापराधस्य अपर्याप्त एवेति मन्ये। केवलं तव स्त्रीत्वादेव वधदण्डो नादिश्यते।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

किन्तु आमरणं कारागृहे निक्षिप्ता एवं स्वापराधस्य पश्चात्तापं करिष्यसीति मम आदेशः। सा एव ते अपराधस्य निष्कृतिः भवितुमर्हति।

जयवर्धनः – (विचिन्त्य) महाराज, काव्येऽस्मिन् हस्तेन प्रतिभाविलासेन कविकालिदासस्य स्मरणम् इति भवतोक्तम्। अतः एका आशङ्का मे मनसि। किं स प्रतिभाशाली पथिकः कालिदास एव स्यात् नु? यतः तस्य आगमनं भवता अपेक्षितम्?

कुमारदासः – (विचार्य, चिन्तया) अमात्य एतेन तव विचारेण मम हृदये ननु वज्रपात इव जातः। अधुना अविलम्बेनैव गमिष्यावः तत्र किरिन्दीतीरम् संशयनिवृत्त्यर्थम्। चतुरिकापि तत्र आगच्छतु अभिज्ञानार्थम्। अमात्य, प्रतिष्ठामहे अस्मिन्नेव क्षणे किरिन्दीतीरम्।

जयवर्धनः – यथाज्ञापयति महाराजः।

[सर्वे निष्क्रान्ताः।]

[तृतीयः प्रवेशः]

[किरिन्दीतीरे श्मशानभूमिः। चितायां न्यस्तं कालिदासस्य कलेवरम्। दीपशिखां हस्ते गृहीत्वा कुम्भीलकः दाहसंस्कारार्थम् उद्यतः। जयवर्धनेन चतुरिकया च सह कुमारदासः प्रविशति।]

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कुमारदासः – तिष्ठ तिष्ठ रे दुरात्मन् कापुरुष! तव एकोऽपि पदन्यासः त्वां स्वाचितां प्रत्येव नेष्यति।

कुम्भीलकः – (दृष्ट्वा भयेन स्वगतम्) अये, स्वयं महाराजः! अमात्यश्च सम्प्राप्तोऽत्र! चतुरिकामपि अत्र पश्यामि! तर्हि हतोऽसि कुम्भीलक! (प्रकाशम्) जयतु भर्ता! प्रणमामि अमात्यवरम्।

कुमारदासः – (चितां प्रति दृष्टिक्षेपं कृत्वा) किमत्रारब्धम्? कोऽसि त्वम्? कस्येयं चिता रचिता?

कुम्भीलकः – कुम्भीलकोऽहं भर्तः! अज्ञातस्य कस्यचित् पथिकस्येयं चिता! अनाथमेतत् पथिकशवं मार्गे पतितं दृष्टं मया! तस्य आत्मनः सद्गति कांक्षया, दाहसंस्कारस्य पुण्यकर्म आरब्धं मया।

जयवर्धनः – पुण्यकर्म नाम! नृशंस, त्वन्मुखे पुण्यकर्म इति वचनं न शोभते। सर्वं सत्यं पूर्वमेव निगदितं चतुरिकया। अंधकारेऽपि कृतं पापकर्म नैव निगुह्यते नराधम!

कुम्भीलकः – क्षम्यतां महाराज! चतुरिकायाः कृत्यमिदम्। अहं तु केवलं साधनभूतः! तस्याः भृत्यत्वात् आज्ञानुसारी! अतः क्षन्तव्यः अहं भर्ता!

कुमारदासः – (क्रोधेन) [illegible]णीं भव! प्रतीक्षस्व यावत् तव निर्णयः क्रियते! सम्प्रति शवस्य एतस्य अभिज्ञानं प्रथमं कर्तव्यम्।

जयवर्धनः – युक्तमुच्यते महाराजेन!

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

[उभौ समीपं गत्वा निरीक्षेते। कुमारदासः कालिदासम् अभिजानाति।]

कुमारदासः - (शोकावेगेन) हन्त! मम सुहृदः कालिदासस्यैव एतत् पार्थिवशरीरम्। रे रे दैवहतक! निष्ठुरं प्रहृतोऽस्मि त्वया। ननु अलौकिक-प्रतिभावतः महाकवेः ईदृशोऽन्तः भवेत्? सोऽपि कस्याश्चित् गणिकायाः धनलोभवशात्? कथं विचित्रेऽयं दैवगतिः!

जयवर्धनः - समाश्वसिहि महाराज! अलं शोकेन।

कुमारदासः - अमात्य, अत्र अहमेव कारणीभूत इति मन्ये। मयैवाहूतः सुहृद्वरः कालिदासोऽत्र।

जयवर्धनः - अलमात्मोपालम्भेन महाराज। तदेव भवति यद् भवितव्यम्।

कुमारदासः - अमात्य, यदि मया प्रियवयस्योऽत्र आहूतो नाभविष्यत्, तादृशी समस्यापूर्तिस्पर्धा वा आयोजिता नाभविष्यत्, तर्हि एतादृशं मरणं मम प्रियवयस्यो नाप्राप्स्यत्। नान्यत् किंचित् चिन्तयितुमहं क्षमः। अमात्य, कालिदासेन विना नाहं जीवितुमिच्छामि। न मे जीवने कापि रुचिरवशिष्टास्ति। भो वयस्य, अयमहम् आगच्छामि त्वया सह अनन्तयात्रार्थम्। (निर्वेदेन) भोः कुम्भीलक, प्रज्वालयैतां चितां तावत्। अहमपि तस्यामेव चितायां स्वात्मानं अग्निसात् करोमि।

[शोकावेगेन हस्ताभ्यां स्वशिरो धारयति]

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जयवर्धनः - समाश्वसितु महाराजः। अलं शोकेन देव। भवतः प्राणत्यागेन न किमपि सिद्ध्यति, भवितव्यता एव एषा स्वीकरणीया स्मासि। निराशया पत्न्या पूर्वं भवनात् निष्कासितस्य तमश्च पुनः अस्वीकरणात्, क्रुद्धया तया अभिशप्तस्य कालिदासस्य 'स्वीकारणात् मरणम्' इत्यैवेषा भवितव्यता आसीत्। तस्याः पतिव्रतायास्तु मुखे आमरणम् कालिदासस्यैव नामधेयमासीत्। अतः अनिवार्येऽस्मिन् भवितव्यतार्थे भवता शोको न कार्यः।

कुमारदासः - कथमेतद् शक्यम् अमात्य? मम प्रियसुहृद् कालिदासस्तु अधुना स्मृतिशेषः। गतो मे प्रियवयस्यः पञ्चत्वम्। न तमहं द्रष्टुं शक्नोमि। [शोकावेगं नाटयति।]

जयवर्धनः - महाराज, जातस्य हि ध्रुवो मृत्युः। तत्र वयं वराकाः किं कर्तुं शक्नुमः? एतेनैव विचारेण समाश्वसितव्यं, यद् एतादृश्यः दिव्यविभूतयः, पार्थिवशरीरे पञ्चत्वं गतेऽपि, यशःशरीरेणामृता भवन्ति।

कुमारदासः - (समाश्वस्य) किमधुना करोमि अमात्य?

जयवर्धनः - महाराज, कालिदासस्यैषा काव्यपरम्परा अस्मिन्नपि प्रदेशे भवता अक्षुण्णतया प्रवर्तनीया। एतदेव भवतो जीवितकार्यं भवतु इति प्रार्थये महाराज।

कुमारदासः - (समाश्वस्य) सत्यं सत्यममात्यवर।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दिव्यविभूतीनाम् अमृतान्येव भवानि यशःशरीराणीति सत्यमेव भवतो वचनम्. अमात्य। (अन्तरिक्षे दृष्ट्वा) भोः प्रियसुहृद् कालिदास, तव पार्थिवशरीरस्य अग्निसात् - करणात् पूर्वमहं प्रतिजानामि, यत् भवतः काव्यपरम्परा अस्मिन्नपि प्रदेशे मया अक्षुण्णतया प्रवर्तयिष्यते इति। मया च तव काव्यपद्धतिमनुसृत्य जानकीहरणं नाम काव्यमपि रचयिष्यते।

जयवर्धनः - साधु, महाराज साधु। भर्तः इदानीं किमन्यदाशास्महे?

कुमारदासः - इदमेव भवतु अमात्यवर।

(- भरतवाक्यम् -)

शापप्रभावेन किल स्वपत्न्याः
मृत्युं स लेभे कविकालिदासः।
अनर्घ्यरत्नोपमकाव्यसम्पदा
यशःशरीरेण चिराय जीवेत् ॥ १ ॥
प्रसादमाधुर्यगुणैर्गुणाढ्यम्
चराचरं यद् रसवत् करोति।
तत्कालिदासस्य रसालकाव्यम्
विदग्धचित्तेषु चिराय जीवेत् ॥ २ ॥

[भरतवाक्यस्य चरणद्वयं कुमारदासः गायति। सर्वेऽन्ये अभिनेतारश्च शनैःशनैः मञ्चे प्रविश्य कुमारदासेन सह एकपंक्तौ स्थित्वा तमनुगायन्ति शेषं भरतवाक्यम् [जवनिका]]

॥ समाप्तम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नाटकस्यैतस्य अद्ययावत् प्रयोगाः।

अस्य नाटकस्य एकाङ्करूपेण प्रथमः प्रयोगः क्रिस्ताब्दस्य २०२०तमे वर्षे फेब्रुवारीमासे अखिलभारतीयनाट्यमहोत्सवे मुम्बईनगरे गोवास्थितया 'अभिव्यक्ती' नाट्यसंस्थया कृतः।

तदनन्तरं गतसप्तमासेषु, मुंबईनगरे पुणेनगरे तथा गोवाप्रदेशेऽपि अस्य नैके प्रयोगाः सम्पन्नाः। गोवा दूरदर्शनेऽपि इदं नाटकं प्रसारितम्। अस्य एकादशः प्रयोगः ईंदौरनगरे कालिदाससंस्कृतअकादमी तथा मध्यप्रदेशसंस्कृतिपरिषदा आयोजिते संस्कृतनाट्यमहोत्सवे, गतसप्टेंबरमासे आयोजितः आसीत्। सर्वत्रैतन्नाटकं नाट्यरसिकानां प्रशंसाभाजनमिति महान् अस्माकं परितोषः।

———×———

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE